# भविष्यपुराणम्
# मध्यमपर्व भागः ॥३॥

# bhaviṣyapurāṇam
# madhyamaparva bhāgaḥ ||3||

## Informazioni:

Titolo: Bhavishya Purana – Madhyama Parva 3
Nome file: bhavishya_purana_madhyama_sanskrit_03
Categoria: Purana
Locazione: https://www.culturavedica.org/
Autore: Vyasa
Linguaggio: Sanscrito
Soggetto: Cose future
Translitterazione: https://www.culturavedica.org/
Correzione: https://www.culturavedica.org/
Data: 30 gennaio 2017
Ultima revisione: 13 giugno 2020
Accesso: https://www.culturavedica.org/purana/
Mail: info@culturavedica.org
Font: Siddhanta – Calibri (IAST)
Testo editabile disponibile: info@culturavedica.org

**© Quest'opera è stata digitalizzata e messa a disposizione da "CulturaVedica" può essere usata per la ricerca e lo studio personale. Non può essere usata (senza permesso) per scopo promozionale o commerciale.**

## Aiutate a mantenere il rispetto e lo spirito del sito

## Sommario


bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||1|| ........ 3

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||2|| ........ 6

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||3|| ........ 10

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||4|| ........ 11

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||5|| ........ 13

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||6|| ........ 15

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||7|| ........ 16

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||8|| ........ 17

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||9|| ........ 18

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||10|| ........ 19

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||11|| ........ 20

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||12|| ........ 21

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||13|| ........ 22

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||14|| ........ 23

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||15|| ........ 24

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||16|| ........ 25

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||17|| ........ 27

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||18|| ........ 28

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||19|| ........ 29

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||20|| ........ 31

| | |
|---|---|
| भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥१॥ | bhaviṣyapurāṇam \|\|2\|\| madhyama parva \|\|3\|\| adhyāyaḥ \|\|1\|\| |
| अत्र गम्यताम्: सञ्चरणम् अन्वेषणम् | atra gamyatām: sañcaraṇam anveṣaṇam |
| उपवनादिप्रतिष्ठावर्णनम् | upavanādipratiṣṭhāvarṇanam |
| सूत उवाच । | sūta uvāca \| |
| आरामादौ विशेषो यो वक्ष्यतेऽत्र मयाधुना । | ārāmādau viśeṣo yo vakṣyate:'tra mayādhunā \| |
| मंडलं कारयित्वा तु चतुरस्रं समं शुभम् ॥१॥ | maṃḍalaṃ kārayitvā tu caturasraṃ samaṃ śubham \|\|1\|\| |
| ऐशान्यां कलशे देवं तत्र नाथं प्रपूजयेत् । | aiśānyāṃ kalaśe devaṃ tatra nāthaṃ prapūjayet \| |
| मध्यमे कलशे पूजा ग्रहाणां च ततः परम् ॥२॥ | madhyame kalaśe pūjā grahāṇāṃ ca tataḥ param \|\|2\|\| |
| स्वदिक्षु द्वारदेशे तु पश्चिमद्वारदेशयोः । | svadikṣu dvāradeśe tu paścimadvāradeśayoḥ \| |
| ब्रह्माणं चाप्यनन्तं च मध्यतो वरुणं यजेत् ॥३॥ | brahmāṇaṃ cāpyanantaṃ ca madhyato varuṇaṃ yajet \|\|3\|\| |
| वरुणं चोदकुम्भस्थं भूतशाखासु शोभनम् । | varuṇaṃ codakumbhasthaṃ bhūtaśākhāsu śobhanam \| |
| तेन चावाहयामि त्वां विभो स्वर्गाय वै भव ॥४॥ | tena cāvāhayāmi tvāṃ vibho svargāya vai bhava \|\|4\|\| |
| पूर्वगं मन्दरं स्थाप्य तोरणोपरि सत्तमाः । | pūrvagaṃ mandaraṃ sthāpya toraṇopari sattamāḥ \| |
| विष्वक्सेनं समभ्यर्च्य अर्चनं स्वर्गसंयुतम् ॥५॥ | viṣvaksenaṃ samabhyarcya arcanaṃ svargasaṃyutam \|\|5\|\| |
| कर्णिकायां वासुदेवं शुद्धस्फटिकसन्निभम् । | karṇikāyāṃ vāsudevaṃ śuddhasphaṭikasannibham \| |
| चतुर्भुजं शङ्खचक्रगदापद्मविभूषितम् ॥६॥ | caturbhujaṃ śaṅkhacakragadāpadmavibhūṣitam \|\|6\|\| |
| श्रीवत्सकौस्तुभोरस्कं मुकुटाद्यैरलंकृतम् । | śrīvatsakaustubhoraskaṃ mukuṭādyairalaṃkṛtam \| |
| दक्षिणे कमला तस्य वामे पुष्टिव्यवस्थितिः ॥७॥ | dakṣiṇe kamalā tasya vāme puṣṭivyavasthitiḥ \|\|7\|\| |
| सिद्धकिन्नरयक्षाद्यैः स्तूयमानं सुरासुरैः । | siddhakinnarayakṣādyaiḥ stūyamānaṃ surāsuraiḥ \| |
| संपूज्य विधिवद्भक्त्या विष्णोरराट इत्यृचा ॥८॥ | saṃpūjya vidhivadbhaktyā viṣṇorarāṭa ityṛcā \|\|8\|\| |
| दले संकर्षणादींश्च विमलाद्याश्च नायिकाः । | dale saṃkarṣaṇādīṃśca vimalādyāśca nāyikāḥ \| |
| संपूज्य धूपदीपाद्यैरुपहारैरनुत्तमैः ॥९॥ | saṃpūjya dhūpadīpādyairupahārairanuttamaiḥ \|\|9\|\| |
| घृतप्रदीपो देवस्य गुग्गुलुः सरलस्तथा । | ghṛtapradīpo devasya gugguluḥ saralastathā \| |
| धूपो देवबलिः क्षीरं परमान्नं घृतप्लुतम् ॥१०॥ | dhūpo devabaliḥ kṣīraṃ paramānnaṃ ghṛtaplutam \|\|10\|\| |
| ध्यायेत्सोमं कर्णिकायां दक्षिणे पद्मसंस्थितम् । | dhyāyetsomaṃ karṇikāyāṃ dakṣiṇe padmasaṃsthitam \| |
| शुक्लाभं द्विभुजं शान्तं केयूराद्युपशोभितम्॥११॥ | śuklābhaṃ dvibhujaṃ śāntaṃ keyūrādyupaśobhitam\|\|11\|\| |
| प्रशस्यं देवयक्षाणां वरदाभयहस्तकम् । | praśasyaṃ devayakṣāṇāṃ varadābhayahastakam \| |
| इमं देवा इति ऋचा उपचारैः पृथग्विधैः ॥१२॥ | imaṃ devā iti ṛcā upacāraiḥ pṛthagvidhaiḥ \|\|12\|\| |
| पूजयेच्च निशानाथं घृतभक्तं निवेदयेत् । | pūjayecca niśānāthaṃ ghṛtabhaktaṃ nivedayet \| |
| इन्द्रं जयन्तमाकाशं वरुणं चाग्निमेव च ॥१३॥ | indraṃ jayantamākāśaṃ varuṇaṃ cāgnimeva ca \|\|13\|\| |
| ईशानं तत्पुरुषं चैव वायुं पूर्वादिदिक्ष्वपि । | īśānaṃ tatpuruṣaṃ caiva vāyuṃ pūrvādidikṣvapi \| |
| कर्णिकाया वामभागे वरदाभयहस्तकम् ॥१४॥ | karṇikāyā vāmabhāge varadābhayahastakam \|\|14\|\| |
| द्विभुजं शुक्लवर्णं च महादेवं प्रपूजयेत् । | dvibhujaṃ śuklavarṇaṃ ca mahādevaṃ prapūjayet \| |
| त्र्यंबकेण च मंत्रेण दद्याच्च घृतपिष्टकम् ॥१५॥ | tryaṃbakeṇa ca maṃtreṇa dadyācca ghṛtapiṣṭakam \|\|15\|\| |
| वासुदेवाय देवाय जुहुयादष्ट आहुतीः । | vāsudevāya devāya juhuyādaṣṭa āhutīḥ \| |
| परमान्नेन सौम्यस्य जुहुयादष्टविंशतिम् ॥१६॥ | paramānnena saumyasya juhuyādaṣṭaviṃśatim \|\|16\|\| |
| शिवाय परमान्नेन जुहुयादाहुतिद्वयम् । | śivāya paramānnena juhuyādāhutidvayam \| |
| गणेशस्य तथाज्येन ददेदेकाहुतिं बुधः । ॥१७॥ | gaṇeśasya tathājyena dadedekāhutiṃ budhaḥ \| \|\|17\|\| |
| ब्रह्मणो वरुणस्याथ एकैकामाहुतिं तथा । | brahmaṇo varuṇasyātha ekaikāmāhutiṃ tathā \| |
| ग्रहाणां स्वोक्तसमिधा दिगीशानां पृथक्पृथक् ॥१८॥ | grahāṇāṃ svoktasamidhā digīśānāṃ pṛthakpṛthak \|\|18\|\| |
| एकैकामाहुतिं दद्यादाज्येन च यथाक्रम् । | ekaikāmāhutiṃ dadyādājyena ca yathākram \| |
| कराली धूमली श्वेता लोहिता कनकप्रभा ॥१९॥ | karālī dhūmalī śvetā lohitā kanakaprabhā \|\|19\|\| |
| अतिरक्ता पद्मरागा वह्निजिह्वा प्रकीर्तिताः । | atiraktā padmarāgā vahnijihvā prakīrtitāḥ \| |
| तासां मंत्राः क्रमेणैव सादिवासांत बिन्दवः ॥२०॥ | tāsāṃ maṃtrāḥ krameṇaiva sādivāsāṃta bindavaḥ \|\|20\|\| |
| यकारस्थाश्च विज्ञेया अष्टस्वरविभूषिताः । | yakārasthāśca vijñeyā aṣṭasvaravibhūṣitāḥ \| |
| घृतमध्वाज्यसिक्ताभिर्होमयेच्च पृथक्पृथक् ॥२१॥ | ghṛtamadhvājyasiktābhirhomayecca pṛthakpṛthak \|\|21\|\| |
| एकैकामाहुतिं दद्याद्दत्त्वा चैव समाहितः । | ekaikāmāhutiṃ dadyāddattvā caiva samāhitaḥ \| |

| | |
|---|---|
| अग्नीषोमं तथेन्द्रं च पृथिवीमन्तरिक्षकम् ॥२२॥ | agnīṣomaṃ tathendraṃ ca pṛthivīmantarikṣakam \|\|22\|\| |
| स्थालीपाकेन जुहुयान्मधुक्षीरयवान्वितम् । | sthālīpākena juhuyānmadhukṣīrayavānvitam \| |
| एकैकामाहुतिं तेषां समुद्दिश्य पृथक्पृथक् ॥२३॥ | ekaikāmāhutiṃ teṣāṃ samuddiśya pṛthakpṛthak \|\|23\|\| |
| यावकैर्गंधपुष्पाद्यैरर्चित्वा सपरावकम् । | yāvakairgaṃdhapuṣpādyairarcitvā saparāvakam \| |
| जपस्व त्वं महाभाग श्रद्धया चैव वाग्यतः ॥२४॥ | japasva tvaṃ mahābhāga śraddhayā caiva vāgyataḥ \|\|24\|\| |
| जापको विधिनानेन प्रजपेत्तत्र रुद्धकम् । | jāpako vidhinānena prajapettatra ruddhakam \| |
| मङ्गलं परमान्नं च सौरसूक्तं तथा जपेत् ॥२५॥ | maṅgalaṃ paramānnaṃ ca saurasūktaṃ tathā japet \|\|25\|\| |
| ततः संमृज्य विधिना स्नापयित्वा यथाविधि । | tataḥ sammṛjya vidhinā snāpayitvā yathāvidhi \| |
| यूपं गर्भे विनिक्षिप्य तत्र कुर्याद्विचक्षणः ॥२६॥ | yūpaṃ garbhe vinikṣipya tatra kuryādvicakṣaṇaḥ \|\|26\|\| |
| ध्वजानारोप्य प्रांतेषु दद्यात्सोमं वनस्पतिम् । | dhvajānāropya prāṃteṣu dadyātsomaṃ vanaspatim \| |
| कोऽदादिति पठित्वा च वृक्षाणां कर्णवेधनम् ॥२७॥ | ko:'dāditi paṭhitvā ca vṛkṣāṇāṃ karṇavedhanam \|\|27\|\| |
| सूच्या सुतीक्ष्णया कार्यं द्विपात्रे वामदक्षिणे । | sūcyā sutīkṣṇayā kāryaṃ dvipātre vāmadakṣiṇe \| |
| नवग्रहाणां तृप्त्यर्थं यावकं लड्डुकं तथा ॥२८॥ | navagrahāṇāṃ tṛptyarthaṃ yāvakaṃ laḍḍukaṃ tathā \|\|28\|\| |
| पिष्टकं च पृथग्दद्यात्कुमारीबालकेषु च । | piṣṭakaṃ ca pṛthagdadyātkumārībālakeṣu ca \| |
| निशारंजितसूत्रेण संवेष्ट्य च सचूर्णकम् ॥२९॥ | niśāraṃjitasūtreṇa saṃveṣṭya ca sacūrṇakam \|\|29\|\| |
| प्रदद्याद्दोहकं चैव वृक्षाणां विधिपूर्वकम् । | pradadyāddohakaṃ caiva vṛkṣāṇāṃ vidhipūrvakam \| |
| प्राशयेच्चैव तान्वृक्षानिमं मन्त्रमुदाहरेत् ॥३०॥ | prāśayeccaiva tānvṛkṣānimaṃ mantramudāharet \|\|30\|\| |
| वृक्षाग्रात्पतितस्यापि आरोहात्पतितस्य च । | vṛkṣāgrātpatitasyāpi ārohātpatitasya ca \| |
| मरणे वास्थिभङ्गे वा कर्ता पापैर्न लिप्यते ॥३१॥ | maraṇe vāsthibhaṅge vā kartā pāpairna lipyate \|\|31\|\| |
| धेनुं सुवर्णं धान्यं च आचार्याय प्रदक्षिणम्। | dhenuṃ suvarṇaṃ dhānyaṃ ca ācāryāya pradakṣiṇam\| |
| दत्त्वा च ऋत्विजे दद्यात्सुवर्णं रजतं तथा ॥३२॥ | dattvā ca ṛtvije dadyātsuvarṇaṃ rajataṃ tathā \|\|32\|\| |
| धान्यं च ब्रह्मणे दद्याद्धृतभोज्यं सशर्करम् । | dhānyaṃ ca brahmaṇe dadyādghṛtabhojyaṃ saśarkaram \| |
| इष्टां च दक्षिणां दद्यात्सदस्याय तथैव च ॥३३॥ | iṣṭāṃ ca dakṣiṇāṃ dadyātsadasyāya tathaiva ca \|\|33\|\| |
| अधिकलशं समानीय स्नानं कुर्याद्विधानतः । | adhikalaśaṃ samānīya snānaṃ kuryādvidhānataḥ \| |
| कृत्वा चैवानिशं कुर्याद्दद्यात्पूर्णाहुतिं तथा ॥३४॥ | kṛtvā caivāniśaṃ kuryāddadyātpūrṇāhutiṃ tathā \|\|34\|\| |
| सर्वौषध्युदकं प्रोक्ष्य त्रिवारं क्षीरधारया । | sarvauṣadhyudakaṃ prokṣya trivāraṃ kṣīradhārayā \| |
| संवेष्ट्य त्रिश्चतुर्वारं ब्रह्मघोषपुरःसरम् ॥३५॥ | saṃveṣṭya triścaturvāraṃ brahmaghoṣapuraḥsaram \|\|35\|\| |
| गृहं व्रजेत्ततो विप्रैः कुर्याच्चैव गृहार्चनम् । | gṛhaṃ vrajettato vipraiḥ kuryāccaiva gṛhārcanam \| |
| तंतौ विशेषं वक्ष्यामि वरा एवेदमित्यृचा ॥३६॥ | taṃtau viśeṣaṃ vakṣyāmi varā evedamityṛcā \|\|36\|\| |
| बलं कामं हयग्रीवं माधवं पुरुषोत्तमम्। | balaṃ kāmaṃ hayagrīvaṃ mādhavaṃ puruṣottamam\| |
| वासुदेवं धनाध्यक्षं ततो नारायणं यजेत् ॥३७॥ | vāsudevaṃ dhanādhyakṣaṃ tato nārāyaṇaṃ yajet \|\|37\|\| |
| दधिभक्तं बलिं दद्यात्पञ्चगव्यसमुद्भवम् । | dadhibhaktaṃ baliṃ dadyātpañcagavyasamudbhavam \| |
| एवं संपूज्य विधिना दक्षिणे पृथिवीं यजेत् ॥३८॥ | evaṃ saṃpūjya vidhinā dakṣiṇe pṛthivīṃ yajet \|\|38\|\| |
| शुद्धकांञ्चनवर्णाभां वराभयकरां शुभाम् । | śuddhakāṃñcanavarṇābhāṃ varābhayakarāṃ śubhām \| |
| मंडूकस्थां च द्विभुजां सर्वालङ्कारसुन्दरीम् ॥३९॥ | maṃḍūkasthāṃ ca dvibhujāṃ sarvālaṅkārasundarīm \|\|39\|\| |
| स्योना पृथिवीति मन्त्रेण पूजयित्वा यथाविधि । | syonā pṛthivīti mantreṇa pūjayitvā yathāvidhi \| |
| पायसं मधुसंयुक्तं बलिं दद्यात्सशर्करम् ॥४०॥ | pāyasaṃ madhusaṃyuktaṃ baliṃ dadyātsaśarkaram \|\|40\|\| |
| वामतो विश्वकर्माणं शुद्धस्फटिकसंनिभम् । | vāmato viśvakarmāṇaṃ śuddhasphaṭikasaṃnibham \| |
| शूलटंकधरं शांतं संयजेदुपचारकैः ॥४१॥ | śūlaṭaṃkadharaṃ śāṃtaṃ saṃyajedupacārakaiḥ \|\|41\|\| |
| विश्वन्निति ऋचा तं च बलिं च मधु पिष्टकम् । | viśvanniti ṛcā taṃ ca baliṃ ca madhu piṣṭakam \| |
| दद्याज्जपेच्च कौष्माण्डं सूक्तं पौरुषमेव च ॥४५॥ | dadyājjapecca kauṣmāṇḍaṃ sūktaṃ pauruṣameva ca \|\|45\|\| |
| मधुपायसयुक्तेन होमानष्टौ विधाय च। | madhupāyasayuktena homānaṣṭau vidhāya ca\| |
| एकैकं होमयेत्पश्चा त्पृथिवीहोमकर्मणि ॥४३॥ | ekaikaṃ homayetpaścā tpṛthivīhomakarmaṇi \|\|43\|\| |
| समुत्सृज्य ततः सेतुमिमं मन्त्रं पठेत्ततः । | samutsṛjya tataḥ setumimaṃ mantraṃ paṭhettataḥ \| |
| पिच्छिले पतितानां च उच्छ्रितेनांगसंगतः ॥४४॥ | picchile patitānāṃ ca ucchritenāṃgasaṃgataḥ \|\|44\|\| |
| प्रतिष्ठिते धर्मसेतौ धर्मो मे स्यान्न पातकम् । | pratiṣṭhite dharmasetau dharmo me syānna pātakam \| |
| सेतोरस्य प्रबन्धस्य श्रद्धया परया तथा ॥४५॥ | setorasya prabandhasya śraddhayā parayā tathā \|\|45\|\| |
| ये चात्र प्राणिनः संति रक्षां कुर्वंति सेतवः । | ye cātra prāṇinaḥ saṃti rakṣāṃ kurvati setavaḥ \| |

| | |
|---|---|
| वेदागमेन यत्पुण्यं यथैव हि समर्पितम् ॥४६॥ | vedāgamena yatpuṇyaṃ yathaiva hi samarpitam \|\|46\|\| |
| गर्तं कृत्वा पञ्चरत्नं संस्थाप्यं तदनन्तरम् । | gartaṃ kṛtvā pañcaratnaṃ saṃsthāpyaṃ tadanantaram \| |
| संस्थाप्य च ततो यूपं संपूज्य च यथाविधि ॥४७॥ | saṃsthāpya ca tato yūpaṃ saṃpūjya ca yathāvidhi \|\|47\|\| |
| आचार्याय ततो दद्यादिष्टां च वरदक्षिणाम् । | ācāryāya tato dadyādiṣṭāṃ ca varadakṣiṇām \| |
| पूजयेद्द्विजदांपत्यं लाजाभिः परिपूजितम् ॥४८॥ | pūjayeddvijadāṃpatyaṃ lājābhiḥ paripūjitam \|\|48\|\| |
| पोटिकां च ततः शय्यां दद्यादिष्टार्थसिद्धये । | poṭikāṃ ca tataḥ śayyāṃ dadyādiṣṭārthasiddhaye \| |
| सेतौ वृक्ष स्थिता ये स्यू रोपयेत्कदलीं शुभाम् ॥४९॥ | setau vṛkṣa sthitā ye syū ropayetkadalīṃ śubhām \|\|49\|\| |
| तेषां पार्श्वद्वयेप्येवमारामे च पृथक्पृथक् ॥५०॥ | teṣāṃ pārśvadvayepyevamārāme ca pṛthakpṛthak \|\|50\|\| |

इति श्रीभविष्ये महापुराणे मध्य मपर्वणि तृतीयभागे प्रथमोऽध्यायः ॥१॥

iti śrībhaviṣye mahāpurāṇe madhya maparvaṇi tṛtīyabhāge prathamo:'dhyāyaḥ ||1||

भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥२॥
अत्र गम्यताम्: सञ्चरणम् अन्वेषणम्
गोप्रचारवैशिष्ट्यवर्णनम्
सूत उवाच ।
गोप्रचारं पुनर्वक्ष्ये विशेषं तत्र मे शृणु ।
यजेद्विष्णुं सल क्ष्मीकमुपचारैः पृथग्विधैः ॥१॥
उपचारैश्च ब्रह्माणं रुद्रं चैव करालिकाम् ।
वराहं सोमसूर्ये च महादेवं यथाक्रमम् ॥२॥
होमं चैव यथा विष्णोः कमलायास्त्रयंत्रयम् ।
आज्येन क्षेत्रपालानामन्येषां मधुमिश्रितैः ॥३॥
एकैकामाहुतिं दद्याल्लाजादिषु पृथक्पृथक् ।
समुत्सृज्य विधानेन यूपं संस्थाप्य पूजयेत् ॥४॥
त्रिहस्तमात्रं रचितं कुर्यान्नागफणान्वितम् ।
रोपयेदेकहस्तेन गर्भे होमं प्रयोजयेत् ॥५॥
लाजासंयुक्तविधिना विश्वेषामिति सञ्जपन् ।
नागाधिपतये तद्वदच्युताय तृतीयकम् ॥६॥
भौमायेति चतुर्थं च ततो यूपं निवेदयेत् ।
मयि गृभ्णामीति सम्पूज्य यूपं च रुद्रदैवतम ॥७॥
संपूज्य रुद्रं पञ्चांगं धान्यं वस्त्रं च दक्षिणाम् ।
आचार्याय तथा होत्रे अन्येषामिष्टदक्षिणाम् ॥८॥
गोप्रचारे च शैलेयं यूपं हस्तद्वयान्वितम् ।
पञ्चशीर्षान्वितं कुर्याद्धस्तमात्रं प्ररोपयेत् ॥९॥
यूपं च चैत्रवृक्षं च कुण्डलीमठपीठिकाम् ।
संस्पृश्याचम्य वै विप्राः प्राणायामेन शुध्यति ॥१०॥
चतुर्हस्तप्रमाणेन शतकुण्डेन संमितम् ।
तदर्धं च कनिष्ठेन अष्टकाष्टाधिकं भवेत् ॥११॥
भूमौ रत्नं च संस्थाप्य इमं मन्त्रमुदाहरेत् ।
शिवलोकस्तथा गावः सर्वदेवसुपूजिताः ॥१२॥
गोभ्य एषा मया भूमिः सम्प्रदत्ता शुभार्थिना ।
एवं निवेदयेद्यस्तु गोप्रचारं समाहितः ॥१३॥
स मुक्तः सर्वपापेभ्यो विष्णुलोके महीयते ।
यावंति तृणगुल्मानि संति भूमौ शुभानि च ॥१४॥
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ।
पूर्वे सीमां निबध्नीयात्कृत्वा वृक्षस्य रोपणम् ॥१५॥
सेतुं कृत्वा दक्षिणतः पश्चिमेंगाररोपणम् ।
उत्तरे खानयेत्कूपं तस्य सीमां न लंघयेत॥१६॥
ततः सहस्रधारां च शस्येन परिपूरिताम् ।
प्रदद्याद्वा ततो विप्राः सर्वपापैः प्रमुच्यते ॥१७॥
नगरग्रामपूर्वे वा उत्तरे पश्चिमेपि वा ।
न कुर्यादग्निदिग्भागे दक्षिणां वा ततः शुभाम् ॥१८॥
गोप्रचारं खनेद्यस्तु वाहयेद्वा कथंचन ।
कुलानि पातयत्याशु ब्रह्महत्याश्च विंदति ॥१९॥
स्वर्गं नयति गोचर्म सम्यग्दत्तं सदक्षिणम् ।
यावत्तृणानि तद्भूमौ सप्तसंख्यानि संख्यया ॥२०॥
तावत्कालं वसेत्स्वर्गे विष्णुलोकान्न तच्युतिः ॥२१॥
महायागावसाने च यो न तर्पयति द्विजान् ।
निरर्थकं तस्य कर्म प्रयासफलमात्रकम् ॥२२॥
वृषोत्सर्गा वसाने तु प्रदद्याद्यो महीं द्विजाः ।

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||2||
atra gamyatām: sañcaraṇam anveṣaṇam
gopracāravaiśiṣṭyavarṇanam
sūta uvāca |
gopracāraṃ punarvakṣye viśeṣaṃ tatra me śṛṇu |
yajedviṣṇuṃ sala kṣmīkamupacāraiḥ pṛthagvidhaiḥ ||1||
upacāraiśca brahmāṇaṃ rudraṃ caiva karālikām |
varāhaṃ somasūrye ca mahādevaṃ yathākramam ||2||
homaṃ caiva yathā viṣṇoḥ kamalāyāstrayaṃtrayam |
ājyena kṣetrapālānāmanyeṣāṃ madhumiśritaiḥ ||3||
ekaikāmāhutiṃ dadyāllājādiṣu pṛthakpṛthak |
samutsṛjya vidhānena yūpaṃ saṃsthāpya pūjayet ||4||
trihastamāttraṃ racitaṃ kuryānnāgaphaṇānvitam |
ropayedekahastena garbhe homaṃ prayojayet ||5||
lājāsaṃyuktavidhinā viśveṣāmiti sañjapan |
nāgādhipataye tadvadacyutāya tṛtīyakam ||6||
bhaumāyeti caturthaṃ ca tato yūpaṃ nivedayet |
mayi gṛbhṇāmīti sampūjya yūpaṃ ca rudradaivatama ||7||
saṃpūjya rudraṃ pañcāṃgaṃ dhānyaṃ vastraṃ ca dakṣiṇām |
ācāryāya tathā hotre anyeṣāmiṣṭadakṣiṇām ||8||
gopracāre ca śaileyaṃ yūpaṃ hastadvayānvitam |
pañcaśīrṣānvitaṃ kuryāddhastamātraṃ praropayet ||9||
yūpaṃ ca caitravṛkṣaṃ ca kuṇḍalīmaṭhapīṭhikām |
saṃspṛśyācamya vai viprāḥ prāṇāyāmena śudhyati ||10||
caturhastapramāṇena śatakuṇḍena saṃmitam |
tadardhaṃ ca kaniṣṭhena aṣṭakāṣṭādhikaṃ bhavet ||11||
bhūmau ratnaṃ ca saṃsthāpya imaṃ mantramudāharet |
śivalokastathā gāvaḥ sarvadevasupūjitāḥ ||12||
gobhya eṣā mayā bhūmiḥ sampradattā śubhārthinā |
evaṃ nivedayedyastu gopracāraṃ samāhitaḥ ||13||
sa muktaḥ sarvapāpebhyo viṣṇuloke mahīyate |
yāvaṃti tṛṇagulmāni saṃti bhūmau śubhāni ca ||14||
tāvadvarṣasahasrāṇi svargaloke mahīyate |
pūrve sīmāṃ nibadhnīyātkṛtvā vṛkṣasya ropaṇam ||15||
setuṃ kṛtvā dakṣiṇataḥ paścimeṃgāraropaṇam |
uttare khānayetkūpaṃ tasya sīmāṃ na laṃghayeta||16||
tataḥ sahasradhārāṃ ca śasyena paripūritām |
pradadyādvā tato viprāḥ sarvapāpaiḥ pramucyate ||17||
nagaragrāmapūrve vā uttare paścimepi vā |
na kuryādagnidigbhāge dakṣiṇāṃ vā tataḥ śubhām ||18||
gopracāraṃ khanedyastu vāhayedvā kathaṃcana |
kulāni pātayatyāśu brahmahatyāśca viṃdati ||19||
svargaṃ nayati gocarma samyagdattaṃ sadakṣiṇam |
yāvattṛṇāni tadbhūmau saptasaṃkhyāni saṃkhyayā ||20||
tāvatkālaṃ vasetsvarge viṣṇulokānna taccyutiḥ ||21||
mahāyāgāvasāne ca yo na tarpayati dvijān |
nirarthakaṃ tasya karma prayāsaphalamātrakam ||22||
vṛṣotsargā vasāne tu pradadyādyo mahīṃ dvijāḥ |

| | |
|---|---|
| न याति विप्राः प्रेतत्वं तस्माद्विप्रादमत्सराः ॥२३॥ | na yāti viprāḥ pretatvaṃ tasmādviprādamatsarāḥ \|\|23\|\| |
| तत्र मानं पृथक्चैव शृणुतात्र समागताः । | tatra mānaṃ pṛthakcaiva śṛṇutātra samāgatāḥ \| |
| अमानेन ददेद्यस्तु नरकं याति रौरवम ॥२४॥ | amānena dadedyastu narakaṃ yāti rauravama \|\|24\|\| |
| गवां शतं वृषश्चैको यत्र तिष्ठत्ययंत्रितः । | gavāṃ śataṃ vṛṣaścaiko yatra tiṣṭhatyayaṃtritaḥ \| |
| तद्गोचर्मेति विख्यातं दत्तं सर्वाघनाशनम् ॥२५॥ | tadgocarmeti vikhyātaṃ dattaṃ sarvāghanāśanam \|\|25\|\| |
| गोप्रचारस्य देवस्य ब्राह्मणस्य च भो द्विजाः । | gopracārasya devasya brāhmaṇasya ca bho dvijāḥ \| |
| यावत्कालावधे सीमा अतीते नास्ति पातकम् ॥२६॥ | yāvatkālāvadhe sīmā atīte nāsti pātakam \|\|26\|\| |
| मण्डपं पूजयेत्सूर्यं वासुदेवसमन्वितम्। | maṇḍapaṃ pūjayetsūryaṃ vāsudevasamanvitam\| |
| होमस्तिल गुडाभ्यां च अष्टावष्टौ पृथक्पृथक् ॥२७॥ | homastila guḍābhyāṃ ca aṣṭāvaṣṭau pṛthakpṛthak \|\|27\|\| |
| देहि मेति च मन्त्रेण विन्यसेन्मंडपोपरि । | dehi meti ca mantreṇa vinyasenmaṃḍapopari \| |
| यत्नसिद्धं ततः कृत्वा शुल्कघटचतुष्टयम्॥२८॥ | yatnasiddhaṃ tataḥ kṛtvā śulkaghaṭacatuṣṭayam\|\|28\|\| |
| समुत्सृजेज्जपेत्पश्चात्सौरं सूक्तं च वैष्णवम् । | samutsṛjejjapetpaścātsauraṃ sūktaṃ ca vaiṣṇavam \| |
| वटपत्रे तु संलिख्य चित्रं निर्माय वा पुनः ॥२९॥ | vaṭapatre tu saṃlikhya citraṃ nirmāya vā punaḥ \|\|29\|\| |
| दिक्पालान्संन्यसेत्स्वासु स्वासु दिक्षु विचक्षणः । | dikpālānsaṃnyasetsvāsu svāsu dikṣu vicakṣaṇaḥ \| |
| बद्धाञ्जलिः पठेन्मंत्रानिंद्रादीनां यथाक्रमम् ॥३०॥ | baddhāñjaliḥ paṭhenmaṃtrānimdrādīnāṃ yathākramam \|\|30\|\| |
| धर्मसंस्थापनार्थाय आत्मनो विभवाय च । | dharmasaṃsthāpanārthāya ātmano vibhavāya ca \| |
| वज्रहस्तो महेन्द्र त्वं धर्मतस्त्रातुमर्हसि ॥३१॥ | vajrahasto mahendra tvaṃ dharmatastrātumarhasi \|\|31\|\| |
| भो वह्ने मेषवाहस्त्वं चतुःशृंगविराजित । | bho vahne meṣavāhastvaṃ catuḥśṛṃgavirājita \| |
| अनाथं मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ॥३२॥ | anāthaṃ maṇḍapaṃ tvaṃ hi dharmatastrātumarhasi \|\|32\|\| |
| यम त्वं दक्षिणाशेश महामहिषवाहन । | yama tvaṃ dakṣiṇāśeśa mahāmahiṣavāhana \| |
| अनाथं मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ॥३३॥ | anāthaṃ maṇḍapaṃ tvaṃ hi dharmatastrātumarhasi \|\|33\|\| |
| मञ्चस्थो राक्षसेन्द्रस्त्वं खड्गपाणिर्महाबलः । | mañcastho rākṣasendrastvaṃ khaḍgapāṇirmahābalaḥ \| |
| अनाथं मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ॥३४॥ | anāthaṃ maṇḍapaṃ tvaṃ hi dharmatastrātumarhasi \|\|34\|\| |
| वारिराट् ध्वजहस्तोऽसि पवनो मृगवाहनः । | vārirāṭ dhvajahasto:'si pavano mṛgavāhanaḥ \| |
| अनाथं मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ॥३५॥ | anāthaṃ maṇḍapaṃ tvaṃ hi dharmatastrātumarhasi \|\|35\|\| |
| धनाध्यक्षो गदाहस्तः पिंगाक्षो नरवाहनः । | dhanādhyakṣo gadāhastaḥ piṃgākṣo naravāhanaḥ \| |
| अनाथं मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ॥३६॥ | anāthaṃ maṇḍapaṃ tvaṃ hi dharmatastrātumarhasi \|\|36\|\| |
| आदिदेवोसि देवानां कर्ता हर्ता महेश्वरः । | ādidevosi devānāṃ kartā hartā maheśvaraḥ \| |
| अनाथं मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ॥३७॥ | anāthaṃ maṇḍapaṃ tvaṃ hi dharmatastrātumarhasi \|\|37\|\| |
| अनंतो नागराजो यो धरामुद्धृत्य तिष्ठति । | anaṃto nāgarājo yo dharāmuddhṛtya tiṣṭhati \| |
| अनाथं मण्डपं त्वं हि धर्मतस्रातुमर्हसि ॥३८॥ | anāthaṃ maṇḍapaṃ tvaṃ hi dharmatasrātumarhasi \|\|38\|\| |
| चतुर्णामेव वर्णानां स्थित्यर्थं मृगपक्षिणाम् । | caturṇāmeva varṇānāṃ sthityarthaṃ mṛgapakṣiṇām \| |
| प्रीतये वासुदेवस्य एवं मण्डपमुत्सृजेत् ॥३९॥ | prītaye vāsudevasya evaṃ maṇḍapamutsṛjet \|\|39\|\| |
| भग्ने स्तम्भे तृणे जीर्णे पुनस्तृणप्रदापने । | bhagne stambhe tṛṇe jīrṇe punastṛṇapradāpane \| |
| स्थापने च तथैवास्य प्रतिष्ठा स्याद्यथाक्षया ॥४०॥ | sthāpane ca tathaivāsya pratiṣṭhā syādyathākṣayā \|\|40\|\| |
| घातापायादिदोषेण म्रियंते यदि जन्तवः । | ghātāpāyādidoṣeṇa mriyaṃte yadi jantavaḥ \| |
| प्रतिष्ठायां कृतायां तु धर्मो मे स्यान्न पातकम् ॥४१॥ | pratiṣṭhāyāṃ kṛtāyāṃ tu dharmo me syānna pātakam \|\|41\|\| |
| मानुषाः पशवो ये च निवसन्तीह मण्डपे । | mānuṣāḥ paśavo ye ca nivasantīha maṇḍape \| |
| स्वस्ति चास्तु सदा तेषां त्वत्प्रसादात्किल प्रभो ॥४२॥ | svasti cāstu sadā teṣāṃ tvatprasādātkila prabho \|\|42\|\| |
| ततस्त्रिगुणसूत्रेण सुत्रामाणेति वै ऋचा । | tatastriguṇasūtreṇa sutrāmāṇeti vai ṛcā \| |
| सप्तधा वेष्टयित्वा तु दक्षिणां संप्रकाश्य च ॥४३॥ | saptadhā veṣṭayitvā tu dakṣiṇāṃ saṃprakāśya ca \|\|43\|\| |
| उपानहौ तथा छत्रमाचार्याय निवेदयेत् । | upānahau tathā chatramācāryāya nivedayet \| |
| मण्डपे भोजयेद्विप्रांस्तेषां दद्याद्यथेप्सितान् । ॥४४॥ | maṇḍape bhojayedviprāṃsteṣāṃ dadyādyathepsitān \| \|\|44\|\| |
| दीनेभ्यश्च पृथग्दद्याद्गृहं विप्रपुरःसरम् । | dīnebhyaśca pṛthagdadyādgṛhaṃ viprapuraḥsaram \| |
| प्रविशेत्तूर्यघोषेण प्रकुर्याच्च गृहार्चनम् ॥४५॥ | praviśettūryaghoṣeṇa prakuryācca gṛhārcanam \|\|45\|\| |
| एवं प्रपायां विज्ञेयो विशेषो वरुणं व्रजेत् । | evaṃ prapāyāṃ vijñeyo viśeṣo varuṇaṃ vrajet \| |
| वासुदेवेन सहितं सांगोपांगं सदक्षिणम् ॥४६॥ | vāsudevena sahitaṃ sāṃgopāṃgaṃ sadakṣiṇam \|\|46\|\| |
| स्थालीपाकविधानेन प्रकुर्याद्देशिकोत्तमः । | sthālīpākavidhānena prakuryāddeśikottamaḥ \| |

आचार्याय गृहं दद्यात्परिच्छेदसमन्वितम् ॥४७॥
ऋत्विजे ताम्रपात्रं च जलपूर्णं च धान्यकम् ।
दिक्पालान्द्वारदेशे तु कूपयागे विशेषतः ॥४८॥
ब्रह्माणं नागराजानं द्वारपालौ च पश्चिमे ।
यजेन्मन्त्रैः पृथग्देवान्मन्त्रैरेभिर्यथाक्रमम् ॥४९॥
बलिदानं विधानेन कृत्वा दद्याद्यथाविधि ।
पताकानामतस्तत्त्वं प्रवक्ष्यामि यथाक्रमम् ॥५०॥
वज्री च धूमली कृष्णा पीता चैवाथ वारुणी ।
शीघ्रा गौरी उमा चैव पीता शुक्ला प्रकीर्तिता ॥५१॥
कुंभेषु पूजयेद्देवान्महेशं प्रथमं बुधः ।
ग्रहांश्च मध्यकलशे ब्रह्माणं च ततः परम् ॥५२॥
वेदिकापूर्वभागे तु उत्तरे कलशे शिवम् ।
दक्षिणे कलशे विष्णुं कर्णिकायां जलेश्वरम् ॥५३॥
कलशे विधिवद्भक्त्या उपचारैः पृथग्विधैः ।
संपूज्य वटपत्रे च नागान्संलिख्य नागजैः ॥५४॥
यो नागास्तान्प्रवक्ष्यामि अनंतो वासुकिस्तथा ।
तथा कर्कोटकश्चैव पद्मश्च कुलिकस्तथा ।
पद्मश्चैव महापद्मो मन्त्रैरेभिः पृथक्पृथक् ॥५५॥
पुंडरीकदलाभास शुभकर्णांतलोचन ।
फणासहस्रसंयुक्त शंखाब्जकृतलोचन ॥५६॥
अनंत नागराजेन्द्र इहागच्छ नमोऽस्तु ते ।
सित कुंदेन्दुवर्णाभ विस्फुरद्भोगमंडल ॥५७॥
सर्वनागस्य शूरस्य कृतस्वस्तिकलांछन ।
नागेन्द्रतक्षक श्रीमन्निहागच्छ नमोस्तु ते ॥५८॥
नवीनजलदश्याम श्रीमन्कमललोचन ।
विषदर्पबलोन्मत्त ग्रीवायामेकशेखर ॥५९॥
शंखपाल इति ख्यात जलाधारप्रतीक्षक ।
अध्यक्षे नागलोकानामिहागच्छ नमोऽस्तु ते ॥६०॥
अतिपीत सुवर्णाभ चन्द्रार्धांकितमस्तक ।
दीप्तभोगकृताटोप शुभलक्षणलक्षित ॥६१॥
कुलीर नागराजेंद्र सर्वसत्त्वहिते रत ।
तिष्ठेह यज्ञसिद्ध्यर्थं कामरूप नमोस्तु ते ॥६२॥
यः सुवर्णेन वर्णेन पद्मपत्रायतेक्षणः ।
पंचबिंदुकृताभोगो ग्रीवायामेकशेखरः ।
तस्मै ते पद्मनागेन्द्र तीव्ररूप नमोऽस्तु ते ॥६३॥
नागिन्यो नागकन्याश्च तथा नागकुमारकाः ।
सर्वे ते प्रीतमनसः पूजां गृह्णंतु मे सदा ॥६४॥
स्वगृह्योक्तेन विधिना कृत्वाग्निस्थापनं बुधः ।
आज्यं संस्कृत्य जुहुयाद्दिगीशानां यथाक्रमम् ॥६५॥
आदित्यादिग्रहांश्चैव ब्रह्माणं कृष्णमेव च ।
मधुपिष्टेन च शिवं वरुणं जुहुयात्ततः ॥६६॥
प्रादेशमात्रं संप्रोक्ष्य यूपं चास्य प्रमाणकम् ।
चतुरस्रं शूलयुक्तं गणानानीय पूजयेत् ॥६७॥
कूपे निक्षिप्य तान्नागान्पञ्चरत्नं क्षिपेत्ततः ।
सुत्रामाणेति मंत्रेण त्रिधा संवेष्ट्य सूत्रकैः ॥६८॥
रञ्जितः कदलीवृक्षं वरुणाय समुत्सृजेत् ।
त्रातारमिति मंत्रेण वस्त्रमाल्येन भूषयेत् ।
कर्णवेधं ततः कृत्वा उत्सृजेद्वाक्यमुच्चरन् ॥६९॥

ācāryāya gṛhaṃ dadyātparicchedasamanvitam ||47||
ṛtvije tāmrapātraṃ ca jalapūrṇaṃ ca dhānyakam |
dikpālāndvāradeśe tu kūpayāge viśeṣataḥ ||48||
brahmāṇaṃ nāgarājānaṃ dvārapālau ca paścime |
yajenmantraiḥ pṛthagdevānmantrairebhiryathākramam ||49||
balidānaṃ vidhānena kṛtvā dadyādyathāvidhi |
patākānāmatastattvaṃ pravakṣyāmi yathākramam ||50||
vajrī ca dhūmalī kṛṣṇā pītā caivātha vāruṇī |
śīghrā gaurī umā caiva pītā śuklā prakīrtitā ||51||
kuṃbheṣu pūjayeddevānmaheśaṃ prathamaṃ budhaḥ |
grahāṃśca madhyakalaśe brahmāṇaṃ ca tataḥ param ||52||
vedikāpūrvabhāge tu uttare kalaśe śivam |
dakṣiṇe kalaśe viṣṇuṃ karṇikāyāṃ jaleśvaram ||53||
kalaśe vidhivadbhaktyā upacāraiḥ pṛthagvidhaiḥ |
saṃpūjya vaṭapatre ca nāgānsaṃlikhya nāgajaiḥ ||54||
yo nāgāstānpravakṣyāmi anaṃto vāsukistathā |
tathā karkoṭakaścaiva padmaśca kulikastathā |
padmaścaiva mahāpadmo mantrairebhiḥ pṛthakpṛthak ||55||
puṃḍarīkadalābhāsa śubhakarṇāṃtalocana |
phaṇāsahasrasaṃyukta śaṃkhābjakṛtalocana ||56||
anaṃta nāgarājendra ihāgaccha namo:'stu te |
sita kuṃdenduvarṇābha visphuradbhogamaṃḍala ||57||
sarvanāgasya śūrasya kṛtasvastikalāṃchana |
nāgendratakṣaka śrīmannihāgaccha namostu te ||58||
navīnajaladaśyāma śrīmankamalalocana |
viṣadarpabalonmatta grīvāyāmekaśekhara ||59||
śaṃkhapāla iti khyāta jalādhārapratīkṣaka |
adhyakṣe nāgalokānāmihāgaccha namo:'stu te ||60||
atipīta suvarṇābha candrārdhāṃkitamastaka |
dīptabhogakṛtāṭopa śubhalakṣaṇalakṣita ||61||
kulīra nāgarājeṃdra sarvasattvahite rata |
tiṣṭheha yajñasiddhyarthaṃ kāmarūpa namostu te ||62||
yaḥ suvarṇena varṇena padmapatrāyatekṣaṇaḥ |
paṃcabiṃdukṛtābhogo grīvāyāmekaśekharaḥ |
tasmai te padmanāgendra tīvrarūpa namo:'stu te ||63||
nāginyo nāgakanyāśca tathā nāgakumārakāḥ |
sarve te prītamanasaḥ pūjāṃ gṛhṇaṃtu me sadā ||64||
svagṛhyoktena vidhinā kṛtvāgnisthāpanaṃ budhaḥ |
ājyaṃ saṃskṛtya juhuyāddigīśānāṃ yathākramam ||65||
ādityādigrahāṃścaiva brahmāṇaṃ kṛṣṇameva ca |
madhupiṣṭena ca śivaṃ varuṇaṃ juhuyāttataḥ ||66||
prādeśamātraṃ saṃprokṣya yūpaṃ cāsya pramāṇakam |
caturasraṃ śūlayuktaṃ gaṇānānīya pūjayet ||67||
kūpe nikṣipya tānnāgānpañcaratnaṃ kṣipettataḥ |
sutrāmāṇeti maṃtreṇa tridhā saṃveṣṭya sūtrakaiḥ ||68||
rañjitaḥ kadalīvṛkṣaṃ varuṇāya samutsṛjet |
trātāramiti maṃtreṇa vastramālyena bhūṣayet |
karṇavedhaṃ tataḥ kṛtvā utsṛjedvākyamuccaran ||69||

| | |
|---|---|
| ॐ अद्येत्यादि सर्वभूतेभ्यः फलपुष्पपत्रच्छायावृत- | oṁ adyetyādi sarvabhūtebhyaḥ phalapuṣpapatracchāyāvṛta- |
| मुख्यनानातरुविरचितमारामं वनस्पतिदेवतं | mukhyanānātaruviracitamārāmaṃ vanaspatidevataṃ |
| सुपूजितं वेदव्यासाद्युक्तफलावाप्तये | supūjitaṃ vedavyāsādyuktaphalāvāptaye |
| अमुकऋषिसगोत्रः अमुकदेव शर्माहमुत्सृजे ।) | amukaṛṣisagotraḥ amukadeva śarmāhamutsṛje \|) |
| महोत्सवं ततः कुर्यात्कृत्वा बद्धाञ्जलिः पठेत् । | mahotsavaṃ tataḥ kuryātkṛtvā baddhāñjaliḥ paṭhet \| |
| वृक्षाग्रात्पतितस्यापि आरोहात्पतितस्य वा ॥७०॥ | vṛkṣāgrātpatitasyāpi ārohātpatitasya vā \|\|70\|\| |
| मरणे चास्थिभंगे वा कर्ता पापैर्न लिप्यते । | maraṇe cāsthibhaṃge vā kartā pāpairna lipyate \| |
| वज्राघातादिदोषेण म्रियंते तरवो यदा ॥७१॥ | vajrāghātādidoṣeṇa mriyaṃte taravo yadā \|\|71\|\| |
| तद्दोशमनार्थाय तस्याप्येतत्प्रतिष्ठितम् । | taddośamanārthāya tasyāpyetatpratiṣṭhitam \| |
| मध्ये यूपं समारोप्य चतुष्को णेपि यत्नतः ॥७२॥ | madhye yūpaṃ samāropya catuṣko ṇepi yatnataḥ \|\|72\|\| |
| मधुलाजाक्षतं दद्यादञ्जनं माल्यमेव च । | madhulājākṣataṃ dadyādañjanaṃ mālyameva ca \| |
| निशासूत्रेण संवेष्ट्य कदलीविटपं न्यसेत् ॥७३॥ | niśāsūtreṇa saṃveṣṭya kadalīviṭapaṃ nyaset \|\|73\|\| |
| वेष्टयेत्क्षीरधारां च पातयेद्धृतधारया । | veṣṭayetkṣīradhārāṃ ca pātayedghṛtadhārayā \| |
| तोयान्वितं गुच्छयुक्तं वेष्टयेत्स्वगृहं व्रजेत्॥७४॥ । | toyānvitaṃ gucchayuktaṃ veṣṭayetsvagṛhaṃ vrajet\|\|74\|\| \| |

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे द्वितीयोऽध्यायः ॥२॥

iti śrībhaviṣye mahāpurāṇe madhyamaparvaṇi tṛtīyabhāge dvitīyo:'dhyāyaḥ ||2||

| | |
|---|---|
| भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥३॥ | bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||3|| |
| अत्र गम्यताम्: सञ्चरणम् अन्वेषणम् | atra gamyatām: sañcaraṇam anveṣaṇam |
| क्षुद्रारामप्रतिष्ठावर्णनम् | kṣudrārāmapratiṣṭhāvarṇanam |
| सूत उवाच । | sūta uvāca \| |
| क्षुद्रारामप्रतिष्ठां च वक्ष्ये वै द्विजसत्तमाः । | kṣudrārāmapratiṣṭhāṃ ca vakṣye vai dvijasattamāḥ \| |
| अमंडले शुभे स्थाने द्विहस्तेऽप्यथ स्थंडिले ॥१॥ | amaṃḍale śubhe sthāne dvihaste:'pyatha sthaṃḍile \|\|1\|\| |
| स्थापयेत्कलशं तत्र विष्णुं सोमं समर्चयेत् । | sthāpayetkalaśaṃ tatra viṣṇuṃ somaṃ samarcayet \| |
| आचार्यमात्रं वरयेन्निशासूत्रैः प्रवेष्टयेत् ॥२॥ | ācāryamātraṃ varayenniśāsūtraiḥ praveṣṭayet \|\|2\|\| |
| वृक्षान्माल्यैरलंकृत्य भूषयेद्भूषणादिना । | vṛkṣānmālyairalaṃkṛtya bhūṣayedbhūṣaṇādinā \| |
| दोहदं च ततो दद्यात्स्थापयेच्छतधारया ॥३॥ | dohadaṃ ca tato dadyātsthāpayecchatadhārayā \|\|3\|\| |
| भोजयेत्पञ्चविप्रान्हि पुरतस्तं विशेषयेत् । | bhojayetpañcaviprānhi puratastaṃ viśeṣayet \| |
| कर्णवेधं ततः कृत्वा उत्सृजेद्वाक्यपूर्वकम् ॥४॥ | karṇavedhaṃ tataḥ kṛtvā utsṛjedvākyapūrvakam \|\|4\|\| |
| दद्याद्यूपं मध्यदेशे रोपयेत्कदलीं ततः । | dadyādyūpaṃ madhyadeśe ropayetkadalīṃ tataḥ \| |
| रंभाश्च रोपयेद्दिक्षु स्थालीपाकविधानतः ॥५॥ | raṃbhāśca ropayeddikṣu sthālīpākavidhānataḥ \|\|5\|\| |
| अष्टावष्टौ च जुहुयादन्येषां च घृतेन तु । | aṣṭāvaṣṭau ca juhuyādanyeṣāṃ ca ghṛtena tu \| |
| एकैकामाहुतिं दद्यात्स्विष्टकृत्तदनंतरम् ॥६॥ | ekaikāmāhutiṃ dadyātsviṣṭakṛttadanaṃtaram \|\|6\|\| |
| दक्षिणां च ततो दद्यात्पूर्णां दत्त्वाहुतिं व्रजेत् ॥७॥ | dakṣiṇāṃ ca tato dadyātpūrṇāṃ dattvāhutiṃ vrajet \|\|7\|\| |
| एकादिवृक्षं वृक्षाणां विधिं वक्ष्ये द्विजोत्तमाः । | ekādivṛkṣaṃ vṛkṣāṇāṃ vidhiṃ vakṣye dvijottamāḥ \| |
| समुत्सृज्य ततो यूपं कर्मणा सह धर्मवित् ॥८॥ | samutsṛjya tato yūpaṃ karmaṇā saha dharmavit \|\|8\|\| |
| वृक्षमूले यजेद्धर्मं पृथिवी च विशं तथा । | vṛkṣamūle yajeddharmaṃ pṛthivī ca viśaṃ tathā \| |
| दिगीशांश्च तथा यक्षानाचार्यं तोषयेत्ततः ॥९॥ | digīśāṃśca tathā yakṣānācāryaṃ toṣayettataḥ \|\|9\|\| |
| धेनुं च दक्षिणां दद्याद्दोहदं वृक्षपूजनम् । | dhenuṃ ca dakṣiṇāṃ dadyāddohadaṃ vṛkṣapūjanam \| |
| कृत्वा सम्यग्विधानेन सवित्रेऽर्घ्यं निवेदयेत् ॥१०॥ | kṛtvā samyagvidhānena savitre:'rghyaṃ nivedayet \|\|10\|\| |

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे तृतीयोऽध्यायः ॥३॥

iti śrībhaviṣye mahāpurāṇe madhyamaparvaṇi tṛtīyabhāge tṛtīyo:'dhyāyaḥ ||3||

| | |
|---|---|
| भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥४॥ | bhaviṣyapurāṇam \|\|2\|\| madhyama parva \|\|3\|\| adhyāyaḥ \|\|4\|\| |
| अत्र गम्यताम्: सञ्चरणम् अन्वेषणम् | atra gamyatām: sañcaraṇam anveṣaṇam |
| क्षुद्रारामप्रतिष्ठावर्णनम् | kṣudrārāmapratiṣṭhāvarṇanam |
| सूत उवाच । | sūta uvāca \| |
| अथाश्वत्थप्रतिष्ठायां मूले बाहुप्रमाणके । | athāśvatthapratiṣṭhāyāṃ mūle bāhupramāṇake\| |
| स्थंडिलं कारयेत्तत्र चंदनेनोक्षितं तथा ॥१॥ | sthaṃḍilaṃ kārayettatra caṃdanenokṣitaṃ tathā \|\|1\|\| |
| पद्मं प्रकल्पयेत्तत्र सामान्यार्घ्यं विधाय च । | padmaṃ prakalpayettatra sāmānyārghyaṃ vidhāya ca \| |
| पूर्वेद्यु रात्रिसमये तद्विष्णोरिति वै ऋचा॥२॥ | pūrvedyu rātrisamaye tadviṣṇoriti vai ṛcā\|\|2\|\| |
| स्थापयेद्वारिणा पूर्णं कया नेति च गन्धकम् । | sthāpayedvāriṇā pūrṇaṃ kayā neti ca gandhakam \| |
| गंधद्वारेति तैलेन श्रीश्च तेति च चन्दनम् ॥३॥ | gaṃdhadvāreti tailena śrīśca teti ca candanam \|\|3\|\| |
| दद्याद्दूर्वाक्षतं कल्पे ब्राह्मणत्रयभोजनम । | dadyāddūrvākṣataṃ kalpe brāhmaṇatrayabhojanama \| |
| कारयेत्सितसूत्रैश्च वेष्टयेच्चन्दनोक्षितैः ॥४॥ | kārayetsitasūtraiśca veṣṭayeccandanokṣitaiḥ \|\|4\|\| |
| कुंभे विनायकं पूज्य ब्रह्माणं च परे घटम् । | kuṃbhe vināyakaṃ pūjya brahmāṇaṃ ca pare ghaṭam \| |
| स्वदिक्षु दिक्पतींश्चैव वृक्षमूले नवग्रहान् ॥५। | svadikṣu dikpatīṃścaiva vṛkṣamūle navagrahān \|\|5\| |
| मंडले शिवमभ्यर्च्य पीठपूजापुरःसरम् । | maṃḍale śivamabhyarcya pīṭhapūjāpuraḥsaram \| |
| अथ ध्यानं प्रवक्ष्यामि श्वेतं वृषभमेव च ॥६॥ | atha dhyānaṃ pravakṣyāmi śvetaṃ vṛṣabhameva ca \|\|6\|\| |
| द्विभुजं शूलहस्तं च सर्वाभरणसंयुतम्। | dvibhujaṃ śūlahastaṃ ca sarvābharaṇasaṃyutam\| |
| आरोपयेत्स्वसामर्थ्याद्भूतशुद्धिं समाचरेत् ॥७॥ | āropayetsvasāmarthyādbhūtaśuddhiṃ samācaret \|\|7\|\| |
| ततोर्घ्यपात्रं कृत्वा तु पीठपूजां समाचरेत् । | tatorghyapātraṃ kṛtvā tu pīṭhapūjāṃ samācaret \| |
| गणेशं गुरुपादं च जयं भद्रं समाहितः ॥८॥ | gaṇeśaṃ gurupādaṃ ca jayaṃ bhadraṃ samāhitaḥ \|\|8\|\| |
| मध्ये आधारशक्तिं च कूर्मानंतौ सपद्मकौ । | madhye ādhāraśaktiṃ ca kūrmānaṃtau sapadmakau \| |
| चन्द्रसूर्याग्निकादीनां मंडलानि क्रमाद्यजेत् ॥९॥ | candrasūryāgnikādīnāṃ maṃḍalāni kramādyajet \|\|9\|\| |
| पुनः पात्रांतरस्थं च गृहीत्वा कुसुमं बुधः । | punaḥ pātrāṃtarasthaṃ ca gṛhītvā kusumaṃ budhaḥ \| |
| पाणिकच्छपिकां कृत्वा ध्यायेद्वै वरुणं तथा ॥१०॥ | pāṇikacchapikāṃ kṛtvā dhyāyedvai varuṇaṃ tathā \|\|10\|\| |
| पूर्ववच्च विधानेन दद्यात्पात्रादिकं त्रयम् । | pūrvavacca vidhānena dadyātpātrādikaṃ trayam \| |
| मधुपर्कं चासनं च पृच्छेच्च स्वागतं पुनः ॥११॥ | madhuparkaṃ cāsanaṃ ca pṛcchecca svāgataṃ punaḥ \|\|11\|\| |
| मुद्रां प्रदर्श्य विधिवदंगपूजां समाचरेत् । | mudrāṃ pradarśya vidhivadaṃgapūjāṃ samācaret \| |
| पूर्वादिपत्रे इन्द्रादीन्ब्रह्माणं मध्यतो यजेत् ॥१२॥ | pūrvādipatre indrādīnbrahmāṇaṃ madhyato yajet \|\|12\|\| |
| अनंतं पुरतश्चैव तेषामस्त्राणि तद्बहिः । | anaṃtaṃ purataścaiva teṣāmastrāṇi tadbahiḥ \| |
| मध्ये तोयाधिपं रुद्रं शांतं चैव प्रशांतकम् ॥१३॥ | madhye toyādhipaṃ rudraṃ śāṃtaṃ caiva praśāṃtakam \|\|13\|\| |
| भूस्तत्त्वं च भुवस्तत्वं स्वस्तत्त्वादि च तत्त्वकम् । | bhūstattvaṃ ca bhuvastatvaṃ svastattvādi ca tattvakam \| |
| कामं धर्ममधर्मं च दिक्षु नारा यणं शिवम् ॥१४॥ । | kāmaṃ dharmamadharmaṃ ca dikṣu nārā yaṇaṃ śivam \|\|14\|\| \| |
| नैर्ऋते च यजेद्दुर्गां पार्श्वयोश्च शतक्रतुम् । | nair–ṛte ca yajeddurgāṃ pārśvayośca śatakratum \| |
| विनायकं च विष्णुं च गङ्गां पृथिविषष्टिकम् ॥१५॥ | vināyakaṃ ca viṣṇuṃ ca gaṅgāṃ pṛthiviṣaṣṭikam \|\|15\|\| |
| षोडशेनोपचारेण पूजयेच्च विशेषतः । | ṣoḍaśenopacāreṇa pūjayecca viśeṣataḥ \| |
| मंडलस्योत्तरे भागे नागरूपमनंतकम् ॥१६॥ | maṃḍalasyottare bhāge nāgarūpamanaṃtakam \|\|16\|\| |
| पंचकृष्णालकैः कुर्याद्बृहत्पर्वप्रमाणकम् । | paṃcakṛṣṇālakaiḥ kuryādbṛhatparvapramāṇakam \| |
| आरोपयेच्चाक्षताद्यैः श्वेतचन्दनपुष्पकैः ॥१७॥ | āropayeccākṣatādyaiḥ śvetacandanapuṣpakaiḥ \|\|17\|\| |
| पूजयेत्परया भक्त्या अग्निकार्यमथाचरेत् । | pūjayetparayā bhaktyā agnikāryamathācaret \| |
| वरुणं जुहुयात्पूर्वं मधुना पायसेन वा ॥१८॥ | varuṇaṃ juhuyātpūrvaṃ madhunā pāyasena vā \|\|18\|\| |
| तिलाक्षतैर्वा आज्यैर्वा त्रिमध्वक्तैरथापि वा । | tilākṣatairvā ājyairvā trimadhvaktairathāpi vā \| |
| अष्टोत्तरशतं कुर्याद्दिगीशानां घृतेन तु ॥१९॥ | aṣṭottaraśataṃ kuryāddigīśānāṃ ghṛtena tu \|\|19\|\| |
| एकैकामाहुतिं दद्यात्पुष्पैस्तिलघृतेन च । | ekaikāmāhutiṃ dadyātpuṣpaistilaghṛtena ca \| |
| नारायणं शिवं दुर्गां गणेशं च ग्रहान्निशि ॥२०॥ | nārāyaṇaṃ śivaṃ durgāṃ gaṇeśaṃ ca grahānniśi \|\|20\|\| |
| अष्टावष्टौ च जुहुयाद्घृतैरेकाहुतिर्भवेत । | aṣṭāvaṣṭau ca juhuyādghṛtairekāhutirbhaveta \| |
| ब्रह्मायुध्वानमिति मंत्रेण ब्रह्माणं पायसेन तु ॥२१॥ | brahmāyudhvānamiti maṃtreṇa brahmāṇaṃ pāyasena tu \|\|21\|\| |
| एकाहुतिं ततो दद्यादापोहिष्ठेति वा त्रिभिः । | ekāhutiṃ tato dadyādāpohiṣṭheti vā tribhiḥ \| |
| ततो वरुणमुद्दिश्य दद्यादाज्याहुतित्रयम् ॥२२॥ | tato varuṇamuddiśya dadyādājyāhutitrayam \|\|22\|\| |

| | |
|---|---|
| इमं वरुण इति वा तद्वरोमा ऋचा पुनः । | imaṃ varuṇa iti vā tadvaromā ṛcā punaḥ \| |
| वरुणस्योत्तंभनमसीति येनापावक एव च ॥२३॥ | varuṇasyottaṃbhanamasīti yenāpāvaka eva ca \|\|23\|\| |
| वातस्ययमिति पुनः पञ्चवर्णं यथाक्रमात् । | vātasyayamiti punaḥ pañcavarṇaṃ yathākramāt \| |
| ततो वरुणमुद्दिश्य घृतेन च गुडैः सह ॥२४॥ | tato varuṇamuddiśya ghṛtena ca guḍaiḥ saha \|\|24\|\| |
| ततः स्विष्टकृते दद्याद्बलिं दद्यादनुक्रमात्। | tataḥ sviṣṭakṛte dadyādbaliṃ dadyādanukramāt\| |
| मध्वाज्यपायसं दद्याद्वरुणाय विशेषतः ॥२५॥ | madhvājyapāyasaṃ dadyādvaruṇāya viśeṣataḥ \|\|25\|\| |
| यवक्षीरं दिगीशेभ्यो ह्यन्येभ्यः पायसेन तु । | yavakṣīraṃ digīśebhyo hyanyebhyaḥ pāyasena tu \| |
| नागाय पिष्टकं दद्याल्लाजाहोमाष्टकं पुनः॥२६॥ | nāgāya piṣṭakaṃ dadyāllājāhomāṣṭakaṃ punaḥ\|\|26\|\| |
| अनंतस्योत्तरे तीरे पद्मपत्रं परिस्तरेत् । | anaṃtasyottare tīre padmapatraṃ paristaret \| |
| अष्टाष्टापदमानेन वरुणं राजतेन तु ॥२७॥ | aṣṭāṣṭāpadamānena varuṇaṃ rājatena tu \|\|27\|\| |
| कुर्यात्पूर्वद्वयेनापि बाणरत्तिसुवर्णकैः । | kuryātpūrvadvayenāpi bāṇarattisuvarṇakaiḥ \| |
| कुर्यात्पुष्करिणीं तत्र पूर्वार्धे चतुरस्रके ॥२८॥ | kuryātpuṣkariṇīṃ tatra pūrvārdhe caturasrake \|\|28\|\| |
| वरुणं विन्यसेत्तत्र तथा पुष्करिणीमपि । | varuṇaṃ vinyasettatra tathā puṣkariṇīmapi \| |
| विधिवद्वाक्यपूर्वेण उत्सृजेच्च जलेशयम् ॥२९॥ | vidhivadvākyapūrveṇa utsṛjecca jaleśayam \|\|29\|\| |
| ॐ अद्येत्यादि विष्णुरूपाय करुणाय | oṁ adyetyādi viṣṇurūpāya karuṇāya |
| श्रुतिरत्याद्युक्तवेदव्याससप्रणीताग्निष्टोमफलप्राप्तये | śrutiratyādyuktavedavyāsasapraṇītāgniṣṭomaphalaprāptaye |
| पुष्करिणीप्रतिष्ठाकर्मणि इमां पुष्करिणीं | puṣkariṇīpratiṣṭhākarmaṇi imāṃ puṣkariṇīṃ |
| सुवर्णराजतां स्वगृह्योदितां सालंकारां | suvarṇarājatāṃ svagṛhyoditāṃ sālaṃkārāṃ |
| सुपूजिताममुकगोत्रः अमुकदेवशर्मा | supūjitāmamukagotraḥ amukadevaśarmā |
| तुभ्यमहं संप्रददे । | tubhyamahaṃ saṃpradade \| |
| इत्युत्सर्गवाक्यम् । | ityutsargavākyam \| |
| ॐ अद्येत्यादि ब्राह्मणमुख्येभ्यः | oṁ adyetyādi brāhmaṇamukhyebhyaḥ |
| ममाग्निष्टोमाद्यनेकफलप्राप्तये इमं जलाशयं | mamāgniṣṭomādyanekaphalaprāptaye imaṃ jalāśayaṃ |
| वरुणदैवतं सुपूजितं चतुर्मुखसहितं चतुः | varuṇadaivataṃ supūjitaṃ caturmukhasahitaṃ catuḥ |
| सत्त्वावच्छिन्नस्नानपानाद्युपभोगाय अमुकसगोत्रः | sattvāvacchinnasnānapānādyupabhogāya amukasagotraḥ |
| अमुकदेवशर्माहमुत्सृजे ।) | amukadevaśarmāhamutsṛje \|) |
| ततो नौकां समादाय मध्यात्किंचित्तथोत्तरे । | tato naukāṃ samādāya madhyātkiṃcittathottare \| |
| जलाशयस्य मध्यं तु ऋत्विग्घोमं चरेत्ततः ॥३०॥ | jalāśayasya madhyaṃ tu ṛtvigghomaṃ carettataḥ \|\|30\|\| |
| पूर्वावस्थायिनीं यष्टिं समारोप्य विधानतः । | pūrvāvasthāyinīṃ yaṣṭiṃ samāropya vidhānataḥ \| |
| ततो वरुण सूक्तेन वरुणं राजतोद्भवम् । | tato varuṇa sūktena varuṇaṃ rājatodbhavam \| |
| पुष्करिण्यासमं तेन नागयष्ट्यंतरे क्षिपेत् ॥३१॥ | puṣkariṇyāsamaṃ tena nāgayaṣṭyaṃtare kṣipet \|\|31\|\| |
| तत्रैवानंतनागं च मंत्रमेतदुदीरयेद्। | tatraivānaṃtanāgaṃ ca maṃtrametadudīrayed\| |
| पुंडरीकदलाभास शुभरक्तांतलोचन । | puṃḍarīkadalābhāsa śubharaktāṃtalocana \| |
| फणासहस्रसंयुक्त सुप्रतिष्ठ नमोऽस्तु ते ॥३२॥ | phaṇāsahasrasaṃyukta supratiṣṭha namo:'stu te \|\|32\|\| |
| दक्षिणां च ततो दद्यात्ततः पूर्णां विधाय च । | dakṣiṇāṃ ca tato dadyāttataḥ pūrṇāṃ vidhāya ca \| |
| मोचयेन्मकरान्ग्राहान्मीनकूर्माञ्जलेचरान् ॥३३॥ | mocayenmakarāngrāhānmīnakūrmāñjalecarān \|\|33\|\| |
| पद्मोत्पलं च शैवालं मंत्रमेव प्रयत्नतः । | padmotpalaṃ ca śaivālaṃ maṃtrameva prayatnataḥ \| |
| पुष्करिण्यां च त्रिः कुर्यात्खातं सर्वप्रदक्षिणाम् ॥३४॥ | puṣkariṇyāṃ ca triḥ kuryātkhātaṃ sarvapradakṣiṇām \|\|34\|\| |
| आदित्याध्यायकं जप्त्वा क्षिपेल्लाजकपर्दकान् । | ādityādhyāyakaṃ japtvā kṣipellājakapardakān \| |
| पातयेत्क्षीरधारां च सहस्रेण शतेन च ॥३५॥ | pātayetkṣīradhārāṃ ca sahasreṇa śatena ca \|\|35\|\| |
| सूत्रेण वेष्टयेत्प्राज्ञो रक्तेन च चतुष्क्रमात् । | sūtreṇa veṣṭayetprājño raktena ca catuṣkramāt \| |
| पथि संतोषयेद्दीनान्संतोष्य च गृहं व्रजेत् ॥३६॥ । | pathi saṃtoṣayeddīnānsaṃtoṣya ca gṛhaṃ vrajet \|\|36\|\| \| |

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे चतुर्थोऽध्यायः ॥४॥

iti śrībhaviṣye mahāpurāṇe madhyamaparvaṇi tṛtīyabhāge caturtho:'dhyāyaḥ ||4||

भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥५॥
अत्र गम्यताम्: सञ्चरणम् अन्वेषणम्
सरोवरादिप्रतिष्ठाविधानवर्णनम्
सूत उवाच ।
नलिन्याश्च तथा वाप्या ह्रदस्य द्विजसत्तमाः ।
विधिं वक्ष्ये सहाङ्गेन विधानं श्रृणुत द्विजाः ॥१॥
स्वर्णपादेन मानेन पूर्वेद्युरधिवास येत् ।
आपोहिष्ठेति मन्त्रेण तथा अस्त्रैः शतैरपि ॥२॥
स्वमण्डले शुभे स्थाने विशेत्पूर्वमुखेन तु ।
गणेशं वरुणं चैव घटे संपूजयेच्छिवम् ॥३॥
वागीशं च तथा विष्णुं सूर्ये कुंभे समर्चयेत् ।
पायसेनाहुतिं दद्याद्वरुणाय घृतेन च ॥४॥
एकैकामाहुतिं दद्यादन्येषां च स्रुवेण च ।
बलिदानं पायसेन उत्सृजेत्तदनंतरम् ॥५॥
यूपं निवेशयेत्पश्चाद्दद्याद्धेनुं च दक्षिणाम् ।
पूर्णं दद्यात्सवित्रेऽर्घ्यं दत्त्वा तु स्वगृहं व्रजेत् ॥६॥
आरामस्य विधिं वक्ष्ये प्रतिष्ठाविधिविस्तरम् ।
हीनारामस्य च तथा एक वृक्षस्य च द्विजाः ॥७॥
अरण्यमध्ये पाश्चात्ये उत्तरे वा विशेषतः ।
मंडपं वर्तुलं कुर्यादर्घ्यहस्तप्रमाणकम् ॥८॥
तद्दक्षिणे भवेत्कुंडं चतुरस्रं समं शुभम् ।
चतुर्मुखं च कर्तव्यं तोरणाद्यैरलंकृतम् ॥९॥
मंदरादिकमावाह्य ततः संपूजयेत्क्रमात् ।
विष्वक्सेनं च तत्रैव पूजयेद्गन्धचन्दनैः ॥१०॥
भृगुं कर्णसमारूढं सर्वभूषणभूषितम् ।
विष्वक्सेनस्य मंत्रोयं पूजायां चैव सर्वतः ॥११॥
द्वारपालं च संपूर्णं गौर्यादीन्कलशेषु च ।
स्वासु दिक्षु दिगीशानां बलिपुष्पाक्षतादि ना ॥१२॥
नैर्ऋत्यवरुणयोर्मध्ये अनंतं प्रतिपूजयेत् ।
इन्द्रेशानयोश्च मध्ये ब्रह्माणं च प्रकल्पयेत् ॥१३॥
वेदिपार्श्वे ततो गत्वा वेदिमावाह्य पूजयेत् ।
आसनं कल्पयित्वा तु सामान्यार्घ्यं विधाय च ॥१४॥
ऐशाने कलशे विद्युद्ब्रह्माणं च तथा ग्रहान् ।
स्वैःस्वैर्मंत्रैर्गंधपुष्पैर्नैवेद्यैश्च पृथग्विधैः ॥१५॥
मडलेशं वासुदेवं सासनं च बृहस्पतिम् ।
पूजयेत्परया भक्त्या पायसान्नं बलिं हरेत् ॥१६॥
द्विभुजं वासुदेवं च शंख चक्रधरं विभुम् ।
पद्मासनगतं ध्यायेत्पीतवस्त्रं सुशोभनम् ॥१७॥
नीलोत्पलदलाभासं हरिचंदनचर्चितम् ।
देवर्षिसिद्धसहितं कलत्रद्वय संयुतम्॥१८॥
ध्यात्वा आरोपयेदेवं बालादीनथ नायकान् ।
विमलाद्या नायिकाश्च दिगीशांश्च यथाविधि ॥१९॥
षोडशोच्चैः पृथग्रूपैः प्रतिपुष्पांजलिक्रमात्।
परितः पूजयेद्विष्णुं शिवं दुर्गां सरस्वतीम् ॥२०॥
शुद्धस्फटिकसंकाशं ध्यायेत्सोमं चतुर्मुखम् ।
अश्वारूढं दिव्य रूपं पद्माक्षं धृतपुष्पकम् ॥२१॥
वरदं देवगंधर्वैः सेवितं मुनिभिः स्तुतम् ।
श्वेतं वनस्पतिं ध्यायेद्द्विभुजं पीतवाससम् ॥२२॥

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||5||
atra gamyatām: sañcaraṇam anveṣaṇam
sarovarādipratiṣṭhāvidhānavarṇanam
sūta uvāca |
nalinyāśca tathā vāpyā hradasya dvijasattamāḥ |
vidhiṃ vakṣye sahāṅgena vidhānaṃ śrṇuta dvijāḥ ||1||
svarṇapādena mānena pūrvedyuradhivāsa yet |
āpohiṣṭheti mantreṇa tathā astraiḥ śatairapi ||2||
svamaṇḍale śubhe sthāne viśetpūrvamukhena tu |
gaṇeśaṃ varuṇaṃ caiva ghaṭe saṃpūjayecchivam ||3||
vāgīśaṃ ca tathā viṣṇuṃ sūrye kuṃbhe samarcayet |
pāyasenāhutiṃ dadyādvaruṇāya ghṛtena ca ||4||
ekaikāmāhutiṃ dadyādanyeṣāṃ ca sruveṇa ca |
balidānaṃ pāyasena utsṛjettadanaṃtaram ||5||
yūpaṃ niveśayetpaścāddadyāddhenuṃ ca dakṣiṇām |
pūrṇaṃ dadyātsavitre:'rghyaṃ dattvā tu svagṛhaṃ vrajet ||6||
ārāmasya vidhiṃ vakṣye pratiṣṭhāvidhivistaram |
hīnārāmasya ca tathā eka vṛkṣasya ca dvijāḥ ||7||
araṇyamadhye pāścātye uttare vā viśeṣataḥ |
maṃḍapaṃ vartulaṃ kuryādarghyahastapramāṇakam ||8||
taddakṣiṇe bhavetkuṃḍaṃ caturasraṃ samaṃ śubham |
caturmukhaṃ ca kartavyaṃ toraṇādyairalaṃkṛtam ||9||
maṃdarādikamāvāhya tataḥ saṃpūjayetkramāt |
viṣvaksenaṃ ca tatraiva pūjayedgandhacandanaiḥ ||10||
bhṛguṃ karṇasamārūḍhaṃ sarvabhūṣaṇabhūṣitam |
viṣvaksenasya maṃtroyaṃ pūjāyāṃ caiva sarvataḥ ||11||
dvārapālaṃ ca saṃpūrṇaṃ gauryādīnkalaśeṣu ca |
svāsu dikṣu digīśānāṃ balipuṣpākṣatādi nā ||12||
nair–ṛtyavaruṇayormadhye anaṃtaṃ pratipūjayet |
indreśānayośca madhye brahmāṇaṃ ca prakalpayet ||13||
vedipārśve tato gatvā vedimāvāhya pūjayet |
āsanaṃ kalpayitvā tu sāmānyārghyaṃ vidhāya ca ||14||
aiśāne kalaśe vidyudbrahmāṇaṃ ca tathā grahān |
svaiḥsvairmaṃtrairgaṃdhapuṣpairnaivedyaiśca pṛthagvidhaiḥ ||15||
maḍaleśaṃ vāsudevaṃ sāsanaṃ ca bṛhaspatim |
pūjayetparayā bhaktyā pāyasānnaṃ baliṃ haret ||16||
dvibhujaṃ vāsudevaṃ ca śaṃkha cakradharaṃ vibhum |
padmāsanagataṃ dhyāyetpītavastraṃ suśobhanam ||17||
nīlotpaladalābhāsaṃ haricaṃdanacarcitam |
devarṣisiddhasahitaṃ kalatradvaya saṃyutam||18||
dhyātvā āropayedevaṃ bālādīnatha nāyakān |
vimalādyā nāyikāśca digīśāṃśca yathāvidhi ||19||
ṣoḍaśoccaiḥ pṛthagrūpaiḥ pratipuṣpāṃjalikramāt|
paritaḥ pūjayedviṣṇuṃ śivaṃ durgāṃ sarasvatīm ||20||
śuddhasphaṭikasaṃkāśaṃ dhyāyetsomaṃ caturmukham |
aśvārūḍhaṃ divya rūpaṃ padmākṣaṃ dhṛtapuṣpakam ||21||
varadaṃ devagaṃdharvaiḥ sevitaṃ munibhiḥ stutam |
śvetaṃ vanaspatiṃ dhyāyeddvibhujaṃ pītavāsasam ||22||

स्वरथस्थं महाबाहुं शंखांकुशसखेटकम् ।
विद्यां च वामतो ध्यायेत्स्वमन्त्रेण च स्थापयेत् ॥२३॥
दशस्वरान्वितं तोयं स्वभावं तमसान्वितम् ।
मंत्रोऽयं देवदेवस्य पूजायां विनियोजयेत् ॥२४॥
नीलं जयं भृंगिणं च परितश्च यथाक्रमात् ।
ततः कुशकंडिकां कृत्वा स्थालीपाकं विधानतः। ॥२५॥
अष्टोत्तरशतं चैव सोमाय द्वादशाहुतीः ।
वानस्पतेस्तथाष्टौ च आज्येऽन्येषां विधीयताम् ॥२६॥
एकैकामाहुतिं दद्यात्सप्तजिह्वामनंतरम् ।
वास्तोष्पतय इति मंत्रेण स्थालीपाकद्वयं नयेत् ॥२७॥
वनस्पतिं समुद्दिश्य ततोयमीरयेद्दचम् ।
वृक्षादीन्स्थापयेत्पूर्वे गायत्र्या प्रथमं बुधः ॥२८॥
अब्जैरग्रं कांस्यवस्त्रं रत्नं दिक्षु यथाक्रमम् ।
ब्रीहयश्चेति मंत्रेण तथा च सरितश्च मे ॥२९॥
मित्रत्रयश्चेति तथा पूषा च म ऋचा तथा ।
संस्थाप्य ब्रीहीन्संवाप्य तत्रैव विधिपूर्वकम् ॥३०॥
क्षिपेद्गङ्गाजलं तोये सर्वौषध्युदकेन च ।
संस्थाप्य यजमानं च सुरास्त्वामिति मन्त्रकैः ॥३१॥
आचार्यमात्मने तत्र संस्थितं द्विजपुंगवैः ।
समाप्य नित्यविधिनाचार्यायाथ च दक्षिणाम् ॥३२॥
धेनुं च लोहपात्रं च दत्त्वा इष्टां च दक्षिणाम् ।
ब्राह्मणेभ्यो यथाशक्ति दद्यात्पूर्णां गृहं व्रजेत् ॥३३॥

svarathastham̟ mahābāhum̟ śam̟khām̟kuśasakheṭakam |
vidyām̟ ca vāmato dhyāyetsvamantreṇa ca sthāpayet ||23||
daśasvarānvitam̟ toyam̟ svabhāvam̟ tamasānvitam |
mam̟tro:'yam̟ devadevasya pūjāyām̟ viniyojayet ||24||
nīlam̟ jayam̟ bhr̥m̟giṇam̟ ca paritaśca yathākramāt |
tataḥ kuśakam̟ḍikām̟ kr̥tvā sthālīpākam̟ vidhānataḥ| ||25||
aṣṭottaraśatam̟ caiva somāya dvādaśāhutīḥ |
vānaspatestathāṣṭau ca ājye:'nyeṣām̟ vidhīyatām ||26||
ekaikāmāhutim̟ dadyātsaptajihvāmanam̟taram |
vāstoṣpataya iti mam̟treṇa sthālīpākadvayam̟ nayet ||27||
vanaspatim̟ samuddiśya tatoyamīrayedr̥cam |
vr̥kṣādīnsthāpayetpūrve gāyatryā prathamam̟ budhaḥ ||28||
abjairagram̟ kām̟syavastram̟ ratnam̟ dikṣu yathākramam |
brīhayaśceti mam̟treṇa tathā ca saritaśca me ||29||
mitratrayaśceti tathā pūṣā ca ma r̥cā tathā |
sam̟sthāpya vrīhīnsam̟vāpya tatraiva vidhipūrvakam ||30||
kṣipedgaṅgājalam̟ toye sarvauṣadhyudakena ca |
sam̟sthāpya yajamānam̟ ca surāstvāmiti mantrakaiḥ ||31||
ācāryamātmane tatra sam̟sthitam̟ dvijapum̟gavaiḥ |
samāpya nityavidhinācāryāyātha ca dakṣiṇām ||32||
dhenum̟ ca lohapātram̟ ca dattvā iṣṭām̟ ca dakṣiṇām |
brāhmaṇebhyo yathāśakti dadyātpūrṇām̟ gr̥ham̟ vrajet ||33||

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे पंचमोऽध्यायः ॥५॥

iti śrībhaviṣye mahāpurāṇe madhyamaparvaṇi tr̥tīyabhāge pam̟camo:'dhyāyaḥ ||5||

| | |
|---|---|
| भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥६॥ | bhaviṣyapurāṇam \|\|2\|\| madhyama parva \|\|3\|\| adhyāyaḥ \|\|6\|\| |
| अत्र गम्यताम्: सञ्चरणम् अन्वेषणम् | atra gamyatām: sañcaraṇam anveṣaṇam |
| क्षुद्रारामप्रतिष्ठावर्णनम् | kṣudrārāmapratiṣṭhāvarṇanam |
| सूत उवाच । | sūta uvāca \| |
| क्षुद्रारामप्रतिष्ठां च वक्ष्ये च द्विजसत्तम । | kṣudrārāmapratiṣṭhāṃ ca vakṣye ca dvijasattama \| |
| अमंडले शुभे स्थाने द्विहस्तम यस्थंडिले ॥१॥ | amaṃḍale śubhe sthāne dvihastama yasthaṃḍile \|\|1\|\| |
| स्थापयेत्कलशं तत्र सोमं विष्णुं समर्चयेत् । | sthāpayetkalaśaṃ tatra somaṃ viṣṇuṃ samarcayet \| |
| आचार्यमात्रं वरयेन्निशासूत्रैः प्रवेष्टयेत् ॥२॥ | ācāryamātraṃ varayenniśāsūtraiḥ praveṣṭayet \|\|2\|\| |
| वृक्षान्माल्यैरलंकृत्य भूषयेद्भूषणादिना । | vṛkṣānmālyairalaṃkṛtya bhūṣayedbhūṣaṇādinā \| |
| दोहदं च ततो दद्यात्स्थापयेच्छितधारया ॥३॥ | dohadaṃ ca tato dadyātsthāpayecchitadhārayā \|\|3\|\| |
| भोजयेत्पंचविप्रांश्च पुरतोंऽते विशेषतः । | bhojayetpaṃcaviprāṃśca puratoṃ:'te viśeṣataḥ \| |
| कर्णवेधं ततः कृत्वा उत्सृजेद्वास्यपूर्वकम्। ॥४॥ | karṇavedhaṃ tataḥ kṛtvā utsṛjedvāsyapūrvakam\| \|\|4\|\| |
| दद्याद्यूपं मध्यदेशे रोपयेत्कदलीं ततः । | dadyādyūpaṃ madhyadeśe ropayetkadalīṃ tataḥ \| |
| रंभां च रोपयेद्दिक्षु स्थालीपाकविधानतः ॥५॥ | raṃbhāṃ ca ropayeddikṣu sthālīpākavidhānataḥ \|\|5\|\| |
| अष्टावष्टौ च जुहुयादन्येषां च घृतेन तु । | aṣṭāvaṣṭau ca juhuyādanyeṣāṃ ca ghṛtena tu \| |
| एकैकामाहुतिं दद्यात्स्विष्टकृत्तदनंतरम् ॥६॥ | ekaikāmāhutiṃ dadyātsviṣṭakṛttadanaṃtaram \|\|6\|\| |
| दक्षिणां च ततो दद्यात्पूर्णां दद्याद्गृहं व्रजेत् ॥७॥ | dakṣiṇāṃ ca tato dadyātpūrṇāṃ dadyādgṛhaṃ vrajet \|\|7\|\| |

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे षष्ठोऽध्यायः ॥६॥

iti śrībhaviṣye mahāpurāṇe madhyamaparvaṇi tṛtīyabhāge ṣaṣṭho:'dhyāyaḥ \|\|6\|\|

| | |
|---|---|
| भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥७॥ | bhaviṣyapurāṇam \|\|2\|\| madhyama parva \|\|3\|\| adhyāyaḥ \|\|7\|\| |
| अत्र गम्यताम्: सञ्चरणम् अन्वेषणम् | atra gamyatām: sañcaraṇam anveṣaṇam |
| श्रेष्ठवृक्षप्रतिष्ठाविधानवर्णनम् | śreṣṭhavṛkṣapratiṣṭhāvidhānavarṇanam |
| सूत उवाच । | sūta uvāca \| |
| एकादिवरवृक्षाणां विधिं वक्ष्ये द्विजोत्तमाः । | ekādivaravṛkṣāṇāṃ vidhiṃ vakṣye dvijottamāḥ \| |
| वृक्षस्य पश्चिमे भागे स्थापयेत्कलशं ततः ॥१॥ | vṛkṣasya paścime bhāge sthāpayetkalaśaṃ tataḥ \|\|1\|\| |
| वृक्षं संस्थापयेत्पूर्वं सूत्रेण परिवेष्टयेत् । | vṛkṣaṃ saṃsthāpayetpūrvaṃ sūtreṇa pariveṣṭayet \| |
| ब्रह्माणं कलशेभ्यश्च सोमं विष्णुं वनस्पतिम् ॥२॥ | brahmāṇaṃ kalaśebhyaśca somaṃ viṣṇuṃ vanaspatim \|\|2\|\| |
| ततस्तिलयवैर्होमानष्टाष्टौ विधिवच्चरेत् । | tatastilayavairhomānaṣṭāṣṭau vidhivaccaret \| |
| समुत्सृज्य ततो यूपं कदल्या सह धर्मवित् ॥३॥ | samutsṛjya tato yūpaṃ kadalyā saha dharmavit \|\|3\|\| |
| वृक्षमूले यजेद्धर्मं पृथिवीं च विशं तथा । | vṛkṣamūle yajeddharmaṃ pṛthivīṃ ca viśaṃ tathā \| |
| दिगीशांश्च तथा यक्षान्नाचार्यं तोषयेत्ततः॥४॥ | digīśāṃśca tathā yakṣānnācāryaṃ toṣayettataḥ\|\|4\|\| |
| धेनुं च दक्षिणां दद्याद्दोहदं वृक्षपूजनम् । | dhenuṃ ca dakṣiṇāṃ dadyāddohadaṃ vṛkṣapūjanam \| |
| कृत्वा सम्यग्विधानेन सवित्रेऽर्घ्यं निवेदयेत् ॥५॥ | kṛtvā samyagvidhānena savitre:'rghyaṃ nivedayet \|\|5\|\| |

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे सप्तमोऽध्यायः ॥७॥

iti śrībhaviṣye mahāpurāṇe madhyamaparvaṇi tṛtīyabhāge saptamo:'dhyāyaḥ ||7||

| | |
|---|---|
| भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥८॥ | bhaviṣyapurāṇam \|\|2\|\| madhyama parva \|\|3\|\| adhyāyaḥ \|\|8\|\| |
| अत्र गम्यताम्: सञ्चरणम् अन्वेषणम् | atra gamyatām: sañcaraṇam anveṣaṇam |
| अश्वत्थप्रतिष्ठाविधानवर्णनम् | aśvatthapratiṣṭhāvidhānavarṇanam |
| सूत उवाच । | sūta uvāca \| |
| अथाश्वत्थप्रतिष्ठायां मूले बाहुप्रमाणकम् । | athāśvatthapratiṣṭhāyām mūle bāhupramāṇakam \| |
| स्थण्डिलं कारयेत्तत्र चंदनेनाङ्कितं यथा ॥१॥ | sthaṇḍilaṃ kārayettatra caṃdanenāṅkitaṃ yathā \|\|1\|\| |
| पद्मं प्रकल्पयेत्तत्र सामान्यार्घ्यं विधाय च । | padmaṃ prakalpayettatra sāmānyārghyaṃ vidhāya ca \| |
| पूर्वेद्यु रात्रिसमये तद्विष्णोरिति वै ऋचा ॥२॥ | pūrvedyu rātrisamaye tadviṣṇoriti vai ṛcā \|\|2\|\| |
| स्थापयेद्वारिणा पूर्णं कया नेति च गंधकम् । | sthāpayedvāriṇā pūrṇaṃ kayā neti ca gaṃdhakam \| |
| गंधद्वारेति तैलेन श्रीश्च तेति च चंदनम् ॥३॥ | gaṃdhadvāreti tailena śrīśca teti ca caṃdanam \|\|3\|\| |
| दद्याद्दूर्वाक्षतं कल्ये ब्राह्मणत्रयभोजनम् । | dadyāddūrvākṣataṃ kalye brāhmaṇatrayabhojanam \| |
| कारयेत्सितसूत्रैश्च वेष्टयेच्चंदनस्य च ॥४॥ | kārayetsitasūtraiśca veṣṭayeccaṃdanasya ca \|\|4\|\| |
| कुम्भे विनायकं पूज्य ब्रह्माणं च परे घटे । | kumbhe vināyakaṃ pūjya brahmāṇaṃ ca pare ghaṭe \| |
| स्वदिक्षु दिक्पतींश्चापि वृक्षमूले नवग्रहान् ॥५॥ | svadikṣu dikpatīṃścāpi vṛkṣamūle navagrahān \|\|5\|\| |
| मंडले शिवमभ्यर्च्यं पीठपूजा पुरःसरम् । | maṃḍale śivamabhyarcyaṃ pīṭhapūjā puraḥsaram \| |
| पूर्वे चंडं प्रचंडं च दक्षिणे नंदिभृंगिणौ ॥६॥ | pūrve caṃḍaṃ pracaṃḍaṃ ca dakṣiṇe naṃdibhṛṃgiṇau \|\|6\|\| |
| अनंतं पश्चिमे काममुत्तरे गणनायकम् । | anaṃtaṃ paścime kāmamuttare gaṇanāyakam \| |
| कार्तिकेयं मध्यदेश आधारशक्तिपूर्वकम् ॥७॥। | kārtikeyaṃ madhyadeśa ādhāraśaktipūrvakam \|\|7\|\|\| |
| अनंतं पृथिवीं चैव त्रिवृत्तं च त्रिमंडलम्। | anaṃtaṃ pṛthivīṃ caiva trivṛttaṃ ca trimaṃḍalam\| |
| अथ ध्यानं प्रवक्ष्यामि श्वेतं वृषभमेव च ॥८॥ | atha dhyānaṃ pravakṣyāmi śvetaṃ vṛṣabhameva ca \|\|8\|\| |
| द्विभुजं शूलहस्तं च सर्वाभरणसंयुतम्। | dvibhujaṃ śūlahastaṃ ca sarvābharaṇasaṃyutam\| |
| आरोपयेत्स्वतंत्रेण मूले विष्णुं समर्चयेत्॥९॥ | āropayetsvataṃtreṇa mūle viṣṇuṃ samarcayet\|\|9\|\| |
| शंकरं च तथा मध्ये अग्रे ब्रह्माणकं यजेत्। | śaṃkaraṃ ca tathā madhye agre brahmāṇakaṃ yajet\| |
| बलिं च पिष्टकान्नं च दत्त्वा च श्रपयेच्चरुम् ॥१०॥ | baliṃ ca piṣṭakānnaṃ ca dattvā ca śrapayeccarum \|\|10\|\| |
| जुहुयाद्रुद्रमुद्दिश्य रुद्रसंख्याहुतिं क्रमात् । | juhuyādrudramuddiśya rudrasaṃkhyāhutiṃ kramāt \| |
| अन्येषां च स्रुवेणैव होमं दद्यात्प्रयत्नतः ॥११॥ | anyeṣāṃ ca sruveṇaiva homaṃ dadyātprayatnataḥ \|\|11\|\| |
| रोपयेत्कदलीवृक्षमाचार्यं परितोषयेत् । | ropayetkadalīvṛkṣamācāryaṃ paritoṣayet \| |
| कृत्वा पूर्णां पंचधारां कृत्वा चापि प्रदक्षिणाम् ॥१२॥ | kṛtvā pūrṇāṃ paṃcadhārāṃ kṛtvā cāpi pradakṣiṇām \|\|12\|\| |
| क्षीरधारां च संपाद्य अर्घ्यं दत्त्वा गृहं व्रजेत् ॥१३॥ | kṣīradhārāṃ ca saṃpādya arghyaṃ dattvā gṛhaṃ vrajet \|\|13\|\| |

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागेऽष्टमोऽध्यायः ॥८॥

iti śrībhaviṣye mahāpurāṇe madhyamaparvaṇi tṛtīyabhāge:'ṣṭamo:'dhyāyaḥ ||8||

| | |
|---|---|
| भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥९॥ | bhaviṣyapurāṇam \|\|2\|\| madhyama parva \|\|3\|\| adhyāyaḥ \|\|9\|\| |
| अत्र गम्यताम्: सञ्चरणम् अन्वेषणम् | atra gamyatām: sañcaraṇam anveṣaṇam |
| वटप्रतिष्ठाविधानवर्णनम् | vaṭapratiṣṭhāvidhānavarṇanam |
| सूत उवाच । | sūta uvāca \| |
| वटस्थानमथो वक्ष्ये तस्य मूले तु दक्षिणे । | vaṭasthānamatho vakṣye tasya mūle tu dakṣiṇe \| |
| त्रिहस्तवेदिमुपरि स्थापयेत्कलशत्रयम् ॥१॥ | trihastavedimupari sthāpayetkalaśatrayam \|\|1\|\| |
| गणेशं च शिवं विष्णुं पूजयित्वा हुनेच्चरुम् । | gaṇeśaṃ ca śivaṃ viṣṇuṃ pūjayitvā huneccarum \| |
| रक्तसूत्रैस्त्रिगुणितैः स्वर्णमेव पुरःसरम्॥२॥ | raktasūtraistriguṇitaiḥ svarṇameva puraḥsaram\|\|2\|\| |
| यवक्षीरबलिं दद्यादुत्सृजेद्वाक्यमुच्चरन्। | yavakṣīrabaliṃ dadyādutsṛjedvākyamuccaran\| |
| यूपमारोपयेत्पश्चाद्वटमूलैः समर्पयेत् ॥३॥ | yūpamāropayetpaścādvaṭamūlaiḥ samarpayet \|\|3\|\| |
| यक्षान्नागांश्च गंधर्वान्सिद्धांश्चैव मरुद्गणान् ॥४॥ । | yakṣānnāgāṃśca gaṃdharvānsiddhāṃścaiva marudgaṇān \|\|4\|\| \| |

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे नवमोऽध्यायः ॥९॥

iti śrībhaviṣye mahāpurāṇe madhyamaparvaṇi tṛtīyabhāge navamo:'dhyāyaḥ ||9||

भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥१०॥
अत्र गम्यताम्: सञ्चरणम् अन्वेषणम्
बिल्वप्रतिष्ठाविधानवर्णनम्
सूत उवाच ।
वक्ष्ये बिल्वप्रतिष्ठां च पूर्वेद्युरधिवासयेत् ।
त्र्यंबकं चेति मंत्रेण स्थापयेद्गंधवारिणा ॥१॥
सुनाभेति च मंत्रेण मे गृह्णामीति चाक्षतम् ।
कयानेति ततो धूपं वस्त्रं माल्यं निवेदयेत् ॥२॥
यजेद्रुद्रं ततो देवं मध्ये दुर्गां धनेश्वरम् ।
ततः कल्ये समुत्थाय नित्यं निर्वर्त्य शास्त्रतः ॥३॥
स्वगृहे सप्त विप्रांश्च भोजयेद्द्विजदंपती ।
मूले हस्तद्वयं दत्त्वा वर्तुला वेदिका भवेत् ॥४॥
तत्र गैरिकयुक्तेन कुसुंभचूर्णकेन वा ।
निशारक्तेन वा कुर्यादष्टपत्रं सुशोभनम् ॥५॥
निवेष्टनं ततः कुर्याद्वृक्षस्य द्विजसत्तमाः ।
रक्त सूत्रैर्वेष्टयेच्च पंचसप्तनवभिस्तु ॥६॥
व्रीहींश्च वापयेत्तत्र उत्तराभिमुखस्तथा ।
शिवं विष्णुं च ब्रह्माणं पूजयेद्भूतिमिच्छता ॥७॥
शिवं च नायकं कुर्यादादित्यान्पत्रमूलके ।
शेषं च तरुमूले तु मध्येऽनंतं शतक्रतुम् ॥८॥
वनपालं च सोमं च सूर्यं पृध्वीमनुक्रमात् ।
होमस्तिलाक्षतैः कार्यो बलिं दद्याद्घृतौदनैः ॥९॥
यक्षेभ्यो माषभक्तं च वायनानि च द्वादश ।
ग्रहाणां प्रीतये दद्यात्क्षीरेणावेष्ट्य दक्षिणाम् ॥१०॥
कांचनं कांस्यपात्रं च तांबूलं ताम्रपात्रकम् ।
यूपारोपं कर्णवेधं सवित्रेऽर्घ्यं निवेदयेत् ॥११॥
अथ रात्रिप्रतिष्ठां च वक्ष्ये शास्त्रानुसारतः ।
यक्षैकवृक्षसंस्कारे न पुनर्जायते भुवि ॥१२॥
पूर्वेद्युरुपवाहे तु वृक्षमूले घटं न्यसेत् ।
विष्णुं शिवं गणेशं च पूजयित्वा तु स्थापयेत् ॥१३॥
कलशान्पञ्च वा सप्त गंधतैलैरलंकृतान् ।
दुग्धेन पंचगव्येन शंखतोयेन यत्नतः ॥१४॥
सूत्रैः संवेष्टनं कृत्वा वस्त्रमाल्यैरनंतरम्।
कांडादिति च मंत्रेण दद्याद्दूर्वा क्षतं ततः ॥१५॥
विष्णुसूक्तेन च पुनः सिंदूरांजनचंदनम्।
दद्यात्फलं च दीपं च स्वयं तत्र स्वपेत्ततः॥१६॥
हुनेत्पंचाहुतीस्तत्र यूपं दद्यात्समुत्सृजेत्॥१८॥
बलिं च पायसेनैव प्रकुर्यात्कर्णवेधनम् ।
वेष्टयेत्क्षीरतोयेन धान्यं धेनुं च दक्षिणाम् ॥१९॥
दद्यादर्घ्यं हुनेत्पूर्णं भोजयेद्द्विजदंपती ॥२०॥

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||10||
atra gamyatām: sañcaraṇam anveṣaṇam
bilvapratiṣṭhāvidhānavarṇanam
sūta uvāca |
vakṣye bilvapratiṣṭhāṃ ca pūrvedyuradhivāsayet |
tryaṃbakaṃ ceti maṃtreṇa sthāpayedgaṃdhavāriṇā ||1||
sunābheti ca maṃtreṇa me gṛhṇāmīti cākṣatam |
kayāneti tato dhūpaṃ vastraṃ mālyaṃ nivedayet ||2||
yajedrudraṃ tato devaṃ madhye durgāṃ dhaneśvaram |
tataḥ kalye samutthāya nityaṃ nirvartya śāstrataḥ ||3||
svagṛhe sapta viprāṃśca bhojayeddvijadaṃpatī |
mūle hastadvayaṃ dattvā vartulā vedikā bhavet ||4||
tatra gairikayuktena kusuṃbhacūrṇakena vā |
niśāraktena vā kuryādaṣṭapatraṃ suśobhanam ||5||
niveṣṭanaṃ tataḥ kuryādvṛkṣasya dvijasattamāḥ |
rakta sūtrairveṣṭayecca paṃcasaptanavabhistu ||6||
vrīhīṃśca vāpayettatra uttarābhimukhastathā |
śivaṃ viṣṇuṃ ca brahmāṇaṃ pūjayedbhūtimicchatā ||7||
śivaṃ ca nāyakaṃ kuryādādityānpatramūlake |
śeṣaṃ ca tarumūle tu madhye:'naṃtaṃ śatakratum ||8||
vanapālaṃ ca somaṃ ca sūryaṃ pṛdhvīmanukramāt |
homastilākṣataiḥ kāryo baliṃ dadyādghṛtaudanaiḥ ||9||
yakṣebhyo māṣabhaktaṃ ca vāyanāni ca dvādaśa |
grahāṇāṃ prītaye dadyātkṣīreṇāveṣṭya dakṣiṇām ||10||
kāṃcanaṃ kāṃsyapātraṃ ca tāṃbūlaṃ tāmrapātrakam |
yūpāropaṃ karṇavedhaṃ savitre:'rghyaṃ nivedayet ||11||
atha rātripratiṣṭhāṃ ca vakṣye śāstrānusārataḥ |
yakṣaikavṛkṣasaṃskāre na punarjāyate bhuvi ||12||
pūrvedyurupavāhe tu vṛkṣamūle ghaṭaṃ nyaset |
viṣṇuṃ śivaṃ gaṇeśaṃ ca pūjayitvā tu sthāpayet ||13||
kalaśānpañca vā sapta gaṃdhatailairalaṃkṛtān |
dugdhena paṃcagavyena śaṃkhatoyena yatnataḥ ||14||
sūtraiḥ saṃveṣṭanaṃ kṛtvā vastramālyairanaṃtaram|
kāṃḍāditi ca maṃtreṇa dadyāddūrvā kṣataṃ tataḥ ||15||
viṣṇusūktena ca punaḥ siṃdūrāṃjanacaṃdanam|
dadyātphalaṃ ca dīpaṃ ca svayaṃ tatra svapettataḥ||16||
hunetpaṃcāhutīstatra yūpaṃ dadyātsamutsṛjet||18||
baliṃ ca pāyasenaiva prakuryātkarṇavedhanam |
veṣṭayetkṣīratoyena dhānyaṃ dhenuṃ ca dakṣiṇām ||19||
dadyādarghyaṃ hunetpūrṇaṃ bhojayeddvijadaṃpatī ||20||

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे दशमोऽध्यायः ॥१०॥

iti śrībhaviṣye mahāpurāṇe madhyamaparvaṇi tṛtīyabhāge daśamo:'dhyāyaḥ ||10||

| | |
|---|---|
| भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥११॥ | bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||11|| |
| अत्र गम्यताम्: सञ्चरणम् अन्वेषणम् | atra gamyatām: sañcaraṇam anveṣaṇam |
| सद्वृक्षप्रतिष्ठाविधानवर्णनम् | sadvṛkṣapratiṣṭhāvidhānavarṇanam |
| सूत उवाच । | sūta uvāca \| |
| शतहस्तमितां मुष्टिं नानातरुविभूषिताम् । | śatahastamitāṃ muṣṭiṃ nānātaruvibhūṣitām \| |
| पूगाम्रादिफलैर्युक्तं वास्तुं कृत्वा यजेत्तु यः ॥१॥ | pūgāmrādiphalairyuktaṃ vāstuṃ kṛtvā yajettu yaḥ ||1|| |
| षष्टिवर्षसहस्राणि स्वर्गलोके वसेच्चिरम्। | ṣaṣṭivarṣasahasrāṇi svargaloke vasecciram\| |
| तद्विधानं प्रवक्ष्यामि यथाशास्त्रानुसारतः ॥२॥ | tadvidhānaṃ pravakṣyāmi yathāśāstrānusārataḥ ||2|| |
| नित्यं निर्वर्त्य विधिवत्पंच विप्रान्समर्चयेत् । | nityaṃ nirvartya vidhivatpaṃca viprānsamarcayet \| |
| भोजयेत्पूजयेद्विष्णुं प्रजापतिसमन्वितम् ॥३॥ | bhojayetpūjayedviṣṇuṃ prajāpatisamanvitam ||3|| |
| अग्निकार्यं ततः कृत्वा दद्याद्विप्राय दक्षिणाम् ॥४॥ । | agnikāryaṃ tataḥ kṛtvā dadyādviprāya dakṣiṇām ||4|| \| |

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभाग एकादशोऽध्यायः॥११॥

iti śrībhaviṣye mahāpurāṇe madhyamaparvaṇi tṛtīyabhāga ekādaśo:'dhyāyaḥ||11||

| | |
|---|---|
| भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥१२॥ | bhaviṣyapurāṇam \|\|2\|\| madhyama parva \|\|3\|\| adhyāyaḥ \|\|12\|\| |
| अत्र गम्यताम्: सञ्चरणम् अन्वेषणम् | atra gamyatām: sañcaraṇam anveṣaṇam |
| मण्डपप्रतिष्ठाविधानवर्णनम् | maṇḍapapratiṣṭhāvidhānavarṇanam |
| सूत उवाच । | sūta uvāca \| |
| प्रतिष्ठां मंडपस्यैव शैलदारुमयस्य च । | pratiṣṭhāṃ maṃḍapasyaiva śailadārumayasya ca \| |
| तृणकाष्ठस्य च विभो तृणवत्तस्य च द्विजाः ॥१॥ | tṛṇakāṣṭhasya ca vibho tṛṇavattasya ca dvijāḥ \|\|1\|\| |
| अधिवासस्य पूर्वेद्युः शुभे लग्ने घटं न्यसेत् । | adhivāsasya pūrvedyuḥ śubhe lagne ghaṭaṃ nyaset \| |
| सूर्यं सोमं तथा विष्णुं कलशे तु समर्चयेत् ॥२॥ | sūryaṃ somaṃ tathā viṣṇuṃ kalaśe tu samarcayet \|\|2\|\| |
| प्रोक्षयेत्कुशतोयेन आपोहिष्ठेति वै ऋचा । | prokṣayetkuśatoyena āpohiṣṭheti vai ṛcā \| |
| आप्यायस्वेति गंधेन गंधद्वारेति गंधकम् ॥३॥ | āpyāyasveti gaṃdhena gaṃdhadvāreti gaṃdhakam \|\|3\|\| |
| आकृष्णेनेति तैलेन श्रीश्च ते इति चंदनम् । | ākṛṣṇeneti tailena śrīśca te iti caṃdanam \| |
| सिंदूरालक्तकं दद्यादंजनं पूर्वया सह ॥४॥ | siṃdūrālaktakaṃ dadyādaṃjanaṃ pūrvayā saha \|\|4\|\| |
| ततः प्रभाते विमले श्राद्धं वृद्ध्यात्मकं चरेत् । | tataḥ prabhāte vimale śrāddhaṃ vṛddhyātmakaṃ caret \| |
| दिक्पालांश्चैव विन्यस्य मंडपे शुभलक्षणे ॥५॥ | dikpālāṃścaiva vinyasya maṃḍape śubhalakṣaṇe \|\|5\|\| |
| मध्ये वेद्यंतरे चैव राजभिर्मडलं लिखेत् । | madhye vedyaṃtare caiva rājabhirmaḍalaṃ likhet \| |
| सूर्यमावाहयेत्तत्र सोमं विष्णुं च पार्श्वयोः ॥६॥ | sūryamāvāhayettatra somaṃ viṣṇuṃ ca pārśvayoḥ \|\|6\|\| |
| गणेशं च ग्रहांश्चैव दिक्पालांश्च घटेऽर्चयेत् । | gaṇeśaṃ ca grahāṃścaiva dikpālāṃśca ghaṭe:'rcayet \| |
| पायसं जुहुयादग्नावष्टोत्तरशतं तथा ॥७॥ | pāyasaṃ juhuyādagnāvaṣṭottaraśataṃ tathā \|\|7\|\| |
| आदित्यस्य तथा विष्णोः सोमस्य द्वादशाहुतीः । | ādityasya tathā viṣṇoḥ somasya dvādaśāhutīḥ \| |
| बलिं च पायसं दद्यात्तैलं क्षीरमथापि वा ॥८॥ | baliṃ ca pāyasaṃ dadyāttailaṃ kṣīramathāpi vā \|\|8\|\| |
| तत उत्सृज्य विधिवद्वाक्यमेतदुदीरयेत् । | tata utsṛjya vidhivadvākyametadudīrayet \| |
| जानुभ्यामवनिं गत्वा शनैरोष्ठं न चालयेत् ॥९॥ | jānubhyāmavaniṃ gatvā śanairoṣṭhaṃ na cālayet \|\|9\|\| |
| वास्तोष्पतिं च तत्रैव पूजयेद्गन्धचन्दनैः । | vāstoṣpatiṃ ca tatraiva pūjayedgandhacandanaiḥ \| |
| अर्घ्यं दद्याच्च विधिवद्भूनैवाहुतिं हुनेत् ॥१०॥ | arghyaṃ dadyācca vidhivadbhūnaivāhutiṃ hunet \|\|10\|\| |
| (ॐ अद्येत्यादि ब्राह्मणादिसर्वसत्त्वेभ्यो | (oṁ adyetyādi brāhmaṇādisarvasattvebhyo |
| विष्णुप्रीणनार्थमिमं मण्डपं सुपूजितं सूर्यदैवतं | viṣṇuprīṇanārthamimaṃ maṇḍapaṃ supūjitaṃ sūryadaivataṃ |
| शैलेयेष्टकादिभिः सर्वसत्त्वेभ्यो रचितं श्रु | śaileyeṣṭakādibhiḥ sarvasattvebhyo racitaṃ śru |
| तिस्मृत्युक्तफलप्राप्तिकामनया अमुकऋषिसगोत्रः | tismṛtyuktaphalaprāptikāmanayā amukarṣisagotraḥ |
| अमुकदेवशर्माहमुत्सृजे ।) | amukadevaśarmāhamutsṛje \|) |
| ततः श्वेतघटं दद्यान्मण्डपोपरि सत्तमाः । | tataḥ śvetaghaṭaṃ dadyānmaṇḍapopari sattamāḥ \| |
| त्रिगुणेन निशाक्तैर्वा वेष्टयेद्वारिधारया । ॥११॥ | triguṇena niśāktairvā veṣṭayedvāridhārayā \| \|\|11\|\| |
| दक्षिणां विधिवद्दद्यात्सूर्यायार्घ्यं निवेदयेत् । | dakṣiṇāṃ vidhivaddadyātsūryāyārghyaṃ nivedayet \| |
| तृणवेश्मनि वै सूर्यं वासुदेवसमन्वितम् ॥१२॥ | tṛṇaveśmani vai sūryaṃ vāsudevasamanvitam \|\|12\|\| |
| घटे गणेशं वरदं वरं कृत्वा समुत्सृजेत् । | ghaṭe gaṇeśaṃ varadaṃ varaṃ kṛtvā samutsṛjet \| |
| ऐशान्यां दापयेद्यूपं ध्वजान्दिक्षु प्रकल्पयेत् ॥१३॥ | aiśānyāṃ dāpayedyūpaṃ dhvajāndikṣu prakalpayet \|\|13\|\| |
| मण्डपोपरि कलशं संस्थाप्य मन्त्रमुच्चरेत् । | maṇḍapopari kalaśaṃ saṃsthāpya mantramuccaret \| |
| प्रपायां वरुणः पूज्यो विश्वकर्मा प्रयत्नतः।॥१४॥ | prapāyāṃ varuṇaḥ pūjyo viśvakarmā prayatnataḥ\|\|\|14\|\| |
| पृथिवीं च गणेशं च पूजयित्वा हुनेद्घृतम् । | pṛthivīṃ ca gaṇeśaṃ ca pūjayitvā hunedghṛtam \| |
| सर्ववर्ज्यमिदं वाक्यं ध्वजमात्रं विधीयते ॥१५॥ । | sarvavarjyamidaṃ vākyaṃ dhvajamātraṃ vidhīyate \|\|15\|\| \| |

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे द्वादशोऽध्यायः ॥१२॥

iti śrībhaviṣye mahāpurāṇe madhyamaparvaṇi tṛtīyabhāge dvādaśo:'dhyāyaḥ ||12||

| | |
|---|---|
| भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥१३॥ | bhaviṣyapurāṇam \|\|2\|\| madhyama parva \|\|3\|\| adhyāyaḥ \|\|13\|\| |
| अत्र गम्यताम्: सञ्चरणम् अन्वेषणम् | atra gamyatām: sañcaraṇam anveṣaṇam |
| महायूपनिर्माणप्रतिष्ठावर्णनम् | mahāyūpanirmāṇapratiṣṭhāvarṇanam |
| सूत उवाच । | sūta uvāca \| |
| चतुर्हस्तं महायूपं हस्तषोडशनिर्मितम् । | caturhastaṃ mahāyūpaṃ hastaṣoḍaśanirmitam \| |
| वक्ष्ये तं च प्रतिष्ठां च रात्रौ त्रैरात्रिकं यजेत् ॥१॥ | vakṣye taṃ ca pratiṣṭhāṃ ca rātrau trairātrikaṃ yajet \|\|1\|\| |
| वरुणं सितकुंभे च प्रपाकूपस्य पश्चिमे । | varuṇaṃ sitakuṃbhe ca prapākūpasya paścime \| |
| गायत्र्या स्नापयेत्पूर्व मापोहिष्ठेति वै क्रमात् ॥२॥ | gāyatryā snāpayetpūrva māpohiṣṭheti vai kramāt \|\|2\|\| |
| गंधद्वारेति गन्धं च अंशुना चेति तैलकम् । | gaṃdhadvāreti gandhaṃ ca aṃśunā ceti tailakam \| |
| मनोन्ना इति कुसुमं धूरसीति च धूपकम् ॥३॥ | manonnā iti kusumaṃ dhūrasīti ca dhūpakam \|\|3\|\| |
| कयानेति ददेद्वस्त्रं नैवेद्यं दीपचन्दनम् । | kayāneti dadedvastraṃ naivedyaṃ dīpacandanam \| |
| आदौ श्राद्धं न कर्तव्यं प्रतिष्ठांते विधीयते ॥४॥ | ādau śrāddhaṃ na kartavyaṃ pratiṣṭhāṃte vidhīyate \|\|4\|\| |
| दंपतीभोजनं कुर्याद्वरयेदेकब्राह्मणम् । | daṃpatībhojanaṃ kuryādvarayedekabrāhmaṇam \| |
| मंडपे चाष्टहस्ते च कलशं तत्र विन्यसेत् ॥५॥ | maṃḍape cāṣṭahaste ca kalaśaṃ tatra vinyaset \|\|5\|\| |
| पूजयेद्वरुणं देवं नारायणसमन्वितम् । | pūjayedvaruṇaṃ devaṃ nārāyaṇasamanvitam \| |
| शिवं च पृथिवीं चैव स्वैः स्वैर्मन्त्रैर्यथाक्रमात् ॥६॥ | śivaṃ ca pṛthivīṃ caiva svaiḥ svairmantrairyathākramāt \|\|6\|\| |
| ततः कुशकंडिकां कृत्वा स्थालीपाकविधानतः । | tataḥ kuśakaṃḍikāṃ kṛtvā sthālīpākavidhānataḥ \| |
| वरुणं च समभ्यर्च्य जुहुयादाहुतीर्दश ॥७॥ | varuṇaṃ ca samabhyarcya juhuyādāhutīrdaśa \|\|7\|\| |
| अन्येषां च स्रुवेणैव दद्यादेकाहुतिं क्रमात् । | anyeṣāṃ ca sruveṇaiva dadyādekāhutiṃ kramāt \| |
| वरुणस्योक्तवरुणं तत्त्वा यामि ततः परम् ॥८॥ | varuṇasyoktavaruṇaṃ tattvā yāmi tataḥ param \|\|8\|\| |
| वरुणस्योत्तंभनमसीति च आभ्यां देवांस्तथैव च । | varuṇasyottaṃbhanamasīti ca ābhyāṃ devāṃstathaiva ca \| |
| येनापावकचक्षसा पंचमं समुदाहृतम् ॥९॥ | yenāpāvakacakṣasā paṃcamaṃ samudāhṛtam \|\|9\|\| |
| रात्रस्य यूपमित्यादि परं च दशमस्तकम् । | rātrasya yūpamityādi paraṃ ca daśamastakam \| |
| ततः स्विष्टकृतं कृत्वा सप्तजिह्वं चरुं नयेत् ॥१०॥ | tataḥ sviṣṭakṛtaṃ kṛtvā saptajihvaṃ caruṃ nayet \|\|10\|\| |
| इह वेत्यादिकं पंच ततः पंचाहुतिं हुनेत् । | iha vetyādikaṃ paṃca tataḥ paṃcāhutiṃ hunet \| |
| शंभवे च पृथिव्यै च महा राजाय च क्रमात् ॥११॥ | śaṃbhave ca pṛthivyai ca mahā rājāya ca kramāt \|\|11\|\| |
| चरुपाकेति नैवेद्यं बलिं चैवागुरूदनम् । | carupāketi naivedyaṃ baliṃ caivāgurūdanam \| |
| शंकराय च रुद्राय शर्वाय पशुपतये इति च । | śaṃkarāya ca rudrāya śarvāya paśupataye iti ca \| |
| उग्राय असनायेति भवाय तद नंतरम् ॥१२॥ | ugrāya asanāyeti bhavāya tada naṃtaram \|\|12\|\| |
| महादेवाय च पुनरीशानायेति च क्रमात् । | mahādevāya ca punarīśānāyeti ca kramāt \| |
| चरुपाकेति नैवेवं बलिं चैवागुरूदनम् ॥१३॥ | carupāketi naivevaṃ baliṃ caivāgurūdanam \|\|13\|\| |
| वाक्यपूर्वं सृजेत्तोयं तत्र वाक्करणं शृणु ॥१४॥ | vākyapūrvaṃ sṛjettoyaṃ tatra vākkaraṇaṃ śṛṇu \|\|14\|\| |
| (ॐ अद्येत्यादि ब्राह्मणादिसर्वसत्त्वेभ्यः | (oṁ adyetyādi brāhmaṇādisarvasattvebhyaḥ |
| अमुकगोत्रस्य मत्पितुरमुकदेवशर्मणः | amukagotrasya matpituramukadevaśarmaṇaḥ |
| श्रुतिस्मृत्यायुक्तं कूपप्रतिष्ठाजन्यफलप्राप्तये | śrutismṛtyāyuktaṃ kūpapratiṣṭhājanyaphalaprāptaye |
| इमं सु पूजितं सच्छादितं वरुणदैवतममुकसगोत्रः | imaṃ su pūjitaṃ sacchāditaṃ varuṇadaivatamamukasagotraḥ |
| अमुकदेवशर्माहमुत्सृजे) । | amukadevaśarmāhamutsṛje) \| |
| दक्षिणां विधिवद् दद्याद्गां च दद्यात्पयस्विनीम् ॥१५॥ | dakṣiṇāṃ vidhivad dadyādgāṃ ca dadyātpayasvinīm \|\|15\|\| |
| मंडपे क्षुद्रकूपे च प्रतिष्ठां शृणुत द्विजाः । | maṃḍape kṣudrakūpe ca pratiṣṭhāṃ śṛṇuta dvijāḥ \| |
| गणेशं वरुणं कुंभे विधिवत्पूजयेत्सुधीः ॥१६॥ | gaṇeśaṃ varuṇaṃ kuṃbhe vidhivatpūjayetsudhīḥ \|\|16\|\| |
| वेष्टयेद्रक्तसूत्रैश्च दद्यायूपं समुत्सृजेत् । | veṣṭayedraktasūtraiśca dadyāyūpaṃ samutsṛjet \| |
| दक्षिणां विधिवद् दद्याद्विप्रान्सं पूजयेत्ततः ॥१७॥ | dakṣiṇāṃ vidhivad dadyādviprānsaṃ pūjayettataḥ \|\|17\|\| |

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे त्रयोदशोऽध्यायः ॥१३॥

iti śrībhaviṣye mahāpurāṇe madhyamaparvaṇi tṛtīyabhāge trayodaśo:'dhyāyaḥ \|\|13\|\|

| | |
|---|---|
| भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥१४॥ | bhaviṣyapurāṇam \|\|2\|\| madhyama parva \|\|3\|\| adhyāyaḥ \|\|14\|\| |
| अत्र गम्यताम्: सञ्चरणम् अन्वेषणम् | atra gamyatām: sañcaraṇam anveṣaṇam |
| पुष्पवाटिकाप्रतिष्ठाविधानवर्णनम् | puṣpavāṭikāpratiṣṭhāvidhānavarṇanam |
| सूत उवाच । | sūta uvāca \| |
| पुष्पारामप्रतिष्ठां तु वक्ष्ये श्रृण्वंतु वै द्विजाः । | puṣpārāmapratiṣṭhāṃ tu vakṣye śṛṇvaṃtu vai dvijāḥ \| |
| मध्ये वेदिं त्रिहस्तां च कृत्वा संस्थापयेद्घटम् ॥१॥ | madhye vediṃ trihastāṃ ca kṛtvā saṃsthāpayedghaṭam \|\|1\|\| |
| अधिवासस्य पूर्वेद्युर्यथावद्विप्रभोजनम् । | adhivāsasya pūrvedyuryathāvadviprabhojanam \| |
| कृत्वा घटे गणेशं च सूर्यं सोमं हुताशनम् ॥२॥ | kṛtvā ghaṭe gaṇeśaṃ ca sūryaṃ somaṃ hutāśanam \|\|2\|\| |
| नारायणं स्थंडिले च जुहुयान्मधुपायसम्। | nārāyaṇaṃ sthaṃḍile ca juhuyānmadhupāyasam\| |
| विधिवद्यूपमारोप्य गोधूमान्सेचयेद्गुरौ ॥३॥ | vidhivadyūpamāropya godhūmānsecayedgurau \|\|3\|\| |
| वेष्टयेद्रक्तसूत्रैश्च प्रदद्याच्चेति दक्षिणाम् । | veṣṭayedraktasūtraiśca pradadyācceti dakṣiṇām \| |
| एतद्धाराजलेनैव यवान्नं सगुडं पयः ॥४॥ | etaddhārājalenaiva yavānnaṃ saguḍaṃ payaḥ \|\|4\|\| |
| ऐशान्यां यूपमारोप्य विधिवद्द्विजसत्तमाः । | aiśānyāṃ yūpamāropya vidhivaddvijasattamāḥ \| |
| कर्णवेधं समारोप्य स्नापयेत्कुशवारिणा ॥५॥ | karṇavedhaṃ samāropya snāpayetkuśavāriṇā \|\|5\|\| |
| धान्यं यवं च गोधूमं दद्याद्विप्राय दक्षिणाम् । | dhānyaṃ yavaṃ ca godhūmaṃ dadyādviprāya dakṣiṇām \| |
| शतधारजलेनैव वेष्टयेत्परितो द्विजाः ॥६॥ । | śatadhārajalenaiva veṣṭayetparito dvijāḥ \|\|6\|\| \| |

इति श्रीभविष्ये महापुराणे मध्यम पर्वणि तृतीयभागे चतुर्दशोऽध्यायः ॥१४॥

iti śrībhaviṣye mahāpurāṇe madhyama parvaṇi tṛtīyabhāge caturdaśo:'dhyāyaḥ ||14||

| | |
|---|---|
| भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥१५॥ | bhaviṣyapurāṇam \|\|2\|\| madhyama parva \|\|3\|\| adhyāyaḥ \|\|15\|\| |
| अत्र गम्यताम्: सञ्चरणम् अन्वेषणम् | atra gamyatām: sañcaraṇam anveṣaṇam |
| तुलसीप्रतिष्ठाविधानवर्णनम् | tulasīpratiṣṭhāvidhānavarṇanam |
| सूत उवाच । | sūta uvāca \| |
| ज्येष्ठाषाढे तुलस्याश्च प्रतिष्ठां विधिवच्चरेत् । | jyeṣṭhāṣāḍhe tulasyāśca pratiṣṭhāṃ vidhivaccaret \| |
| यजमानः शुद्धदिने एका दश्यामथापि वा ॥१॥ | yajamānaḥ śuddhadine ekā daśyāmathāpi vā \|\|1\|\| |
| ततो रात्रौ घटं स्थाप्य पूजयेत्परमेश्वरम् । | tato rātrau ghaṭaṃ sthāpya pūjayetparameśvaram \| |
| नारायणं शिवं सोमं ब्रह्माणं चेंद्रमेव च ॥२॥ | nārāyaṇaṃ śivaṃ somaṃ brahmāṇaṃ ceṃdrameva ca \|\|2\|\| |
| गायत्र्या स्नपनं कुर्यात्तथो क्तैर्मंत्रकैरपि । | gāyatryā snapanaṃ kuryāttatho ktairmaṃtrakairapi \| |
| कयानेति च गंधेन अश्रुनेति च तैलकम् ॥३॥ | kayāneti ca gaṃdhena aśruneti ca tailakam \|\|3\|\| |
| त्वां गंधर्वेति च पुनः पुष्पं मंडंशनेति च । | tvāṃ gaṃdharveti ca punaḥ puṣpaṃ maṃḍaṃśaneti ca \| |
| मानस्तोकेति कुसुमं श्रीश्चतेति च चंदनम् ॥४॥ | mānastoketi kusumaṃ śrīścateti ca caṃdanam \|\|4\|\| |
| वैश्वदेवीति च पुनर्मंत्रेणानेन चंदनम् । | vaiśvadevīti ca punarmaṃtreṇānena caṃdanam \| |
| दूर्वामंत्रेण दूर्वाश्च रूपेणेति च दर्प्पणम् ॥५॥ | dūrvāmaṃtreṇa dūrvāśca rūpeṇeti ca darppaṇam \|\|5\|\| |
| फलमंत्रेण च फलं समेधेति च अंज नम् । | phalamaṃtreṇa ca phalaṃ samedheti ca aṃja nam \| |
| सकुशैः पीतसूत्राद्यैर्वेष्टयेत्क्षीरधारया ॥६॥ | sakuśaiḥ pītasūtrādyairveṣṭayetkṣīradhārayā \|\|6\|\| |
| शतधाराजलेनैव वेष्टयेत्स्वगृहं व्रजेत् । | śatadhārājalenaiva veṣṭayetsvagṛhaṃ vrajet \| |
| वस्त्रेणावृत्य विधिवद्बुधः काले घटं न्यसेत् ॥७॥ | vastreṇāvṛtya vidhivadbudhaḥ kāle ghaṭaṃ nyaset \|\|7\|\| |
| सप्तपंचत्रिभिर्वाथ तद्विष्णोरिति वै ऋचा । | saptapaṃcatribhirvātha tadviṣṇoriti vai ṛcā \| |
| स्नापयेदथ साध्वीभिः कृतमंगलपूर्वकम् ॥८॥ | snāpayedatha sādhvībhiḥ kṛtamaṃgalapūrvakam \|\|8\|\| |
| ततः श्राद्धं समाप्यैव मातृपूजापुरःसरम् । | tataḥ śrāddhaṃ samāpyaiva mātṛpūjāpuraḥsaram \| |
| आचार्यं वरयेत्पूर्वं गंधाद्यैः कुसुमैरपि ॥९॥ | ācāryaṃ varayetpūrvaṃ gaṃdhādyaiḥ kusumairapi \|\|9\|\| |
| आचार्य एव होता स्याद्ब्रह्माणं च सदस्यकम् । | ācārya eva hotā syādbrahmāṇaṃ ca sadasyakam \| |
| मंडपे दशहस्तेऽपि वर्तुले स्थंडिलेषु च ॥१०॥ | maṃḍape daśahaste:'pi vartule sthaṃḍileṣu ca \|\|10\|\| |
| सहस्रं मंडलं कुर्यात्तत्र नारायणं यजेत् । | sahasraṃ maṃḍalaṃ kuryāttatra nārāyaṇaṃ yajet \| |
| ग्रहाँल्लोकेश्वरान्मध्ये आदित्यांश्च मरुद्गणान्॥११॥ | grahām̐llokeśvarānmadhye ādityāṃśca marudgaṇān\|\|11\|\| |
| रुद्रान्वसूंश्च कलशे परितश्च समर्चयेत् । | rudrānvasūṃśca kalaśe paritaśca samarcayet \| |
| ततः कुशकंडिकां कृत्वा होमं तिलयवेन तु ॥१२॥ | tataḥ kuśakaṃḍikāṃ kṛtvā homaṃ tilayavena tu \|\|12\|\| |
| अष्टोत्तरशतं कुर्यादन्येषां शक्तितो हुनेत् । | aṣṭottaraśataṃ kuryādanyeṣāṃ śaktito hunet \| |
| नारायणं समुद्दिश्य दद्यादुत्सृज्य सत्तमाः ॥१३॥ | nārāyaṇaṃ samuddiśya dadyādutsṛjya sattamāḥ \|\|13\|\| |
| मध्ये यूपं समु द्दिश्य चरुपाकं बलिं ददेत् । | madhye yūpaṃ samu ddiśya carupākaṃ baliṃ dadet \| |
| कदलीं दिक्षु संन्यस्य ध्वजान्दिक्षु प्ररोपयेत् ॥१४॥ | kadalīṃ dikṣu saṃnyasya dhvajāndikṣu praropayet \|\|14\|\| |
| दक्षिणां कांचनं दद्यात्तिलं धान्यं सपुष्पकम् । | dakṣiṇāṃ kāṃcanaṃ dadyāttilaṃ dhānyaṃ sapuṣpakam \| |
| धेनुं पयस्विनीं दयाद्वेष्टयेत्क्षीरधारया॥१५॥ | dhenuṃ payasvinīṃ dayādveṣṭayetkṣīradhārayā\|\|15\|\| |
| जयंत्याः सोमवृक्षस्य तथा सोमवटस्य च । | jayaṃtyāḥ somavṛkṣasya tathā somavaṭasya ca \| |
| पनसस्य कदंबस्य निंबस्य द्विजसत्तमाः ॥१६॥ | panasasya kadaṃbasya niṃbasya dvijasattamāḥ \|\|16\|\| |
| पाटला कनकस्यैव शाल्मलीनिंबकस्य च । | pāṭalā kanakasyaiva śālmalīniṃbakasya ca \| |
| बिंबाशोकवटस्यैव प्रतिष्ठां नैव कारयेत् ॥१७॥ | biṃbāśokavaṭasyaiva pratiṣṭhāṃ naiva kārayet \|\|17\|\| |
| भद्रकस्य शमीकोणचंडातकबकस्य च । | bhadrakasya śamīkoṇacaṃḍātakabakasya ca \| |
| खदिरस्यैव कर्तव्यं कर्णवेधं न कारयेत् ॥१८॥ | khadirasyaiva kartavyaṃ karṇavedhaṃ na kārayet \|\|18\|\| |

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे पंचदशोऽध्यायः ।

iti śrībhaviṣye mahāpurāṇe madhyamaparvaṇi tṛtīyabhāge paṃcadaśo:'dhyāyaḥ |

भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥१६॥
अत्र गम्यताम्: सञ्चरणम् अन्वेषणम्
प्रतिष्ठाविशेषनियमवर्णनम्
सूत उवाच ।
वृक्षादीनां प्रतिष्ठां च उत्तमेषूत्तमं चरेत् ।
मध्येमध्ये कनिष्ठा तु कनिष्ठं परिकीर्तितम् ॥१॥
वर्तुलं मंडलं कुर्यात्तत्तु शीर्षे तथान्त्यके ।
मध्ये वा वेदिकां कुर्यात्तन्मध्ये कुंडमंडलम् ॥२॥
पूर्वेद्यू रात्रिसमये घटं संस्थाप्य पूजयेत् ।
शेषं संपूज्य विधिवत्पृथिवीं च शिवं तथा ॥३॥
गंधतोयेन गायत्र्या सेतुं संपूज्य मोक्षयेत् ।
कयानेति च मन्त्रेण आप्यायस्वेति वै ऋचा ॥४॥
दद्याद्गन्धादिकं श्रीश्च ते लक्ष्मीरिति चन्दनम् ।
दूर्वामन्त्रेण दूर्वाश्च फलमन्त्रेण वै फलम् ॥५॥
शन्नोदेवीति मन्त्रेण दद्यात्कुशपवित्रकम् ।
सुरासुरेति मन्त्रेण प्रदद्याद्वस्त्रयुग्मकम् ॥६॥
अञ्जनालक्तकं कुर्यान्मनोन्ना इति संपठन्।
कुर्याच्छ्राद्धं परदिने वसुधारापुरःसरम् ॥७॥
वरयेदथ आचार्यं होतारं नृवरश्चरेत् ।
पात्रद्वयं विधातव्यं सदस्याचार्यमेव च ॥८॥
सेतुयागे विधातव्यं तथा धान्याचलेपि च ।
सहस्रहोमे वैकं तु विवाहे ब्रह्मऋत्विजौ ॥९॥
यजेदेनं कृते मौलियागार्थं यागमंडपम् ।
वेदिमावाहयेत्पूर्वं मंडपं प्रतिपूजयेत् ॥१०॥
विघ्नग्रहाँल्लोकपालान्सर्वसिद्धिप्रदायकान्।
स्थंडिले सर्वतोभद्रे शेषं विष्णुं प्रदर्शयेत् ॥११॥
तत्रैव तु वराहाख्यं प्रतीतमृत्विगुत्तमम् ।
स्थालीपाकेन जुहुयादष्टाविंशतिकत्रयम् ॥१२॥
आज्येन तु वराहस्य होमपञ्चकमीरितम् ।
ततस्तिलयवेनैव एकैकामाहुतिं क्रमात् ॥१३॥
बलिं दद्यात्पृथग्रूपं शेषयेद्विधिपूर्वकम् ।
पिष्टकान्नं घृतान्नं च विस्तरे वा गुडौदनम् ॥१४॥
माषभक्तं तु लोकाय पृथिव्यै परमान्नकम् ।
वाक्यपूर्वं सृजेद्धीरो वाक्यप्रकरणं शृणु ॥१५॥
(ॐ अद्येत्यादि एकविंशतिकुलस्य
विशिष्टस्वर्गप्राप्तय इमं सेतुं संक्रमसमेतं
विष्णुदैवतं सुरपूजितं विधिवद्वासुदेवस्य
प्रीतयेऽहमुत्सृजे ।)
बद्धांञ्जलिः पठेन्मन्त्रं कुर्याच्च विधिवत्ततः ।
पिच्छिले पतितानां च उद्गतेनाङ्गभङ्गतः ।
प्रतिष्ठिते धर्मसेतौ धर्मो मे स्यान्न पातकम् ॥१६॥
सेतोरस्य प्रबन्धस्य श्रद्धया परया युतः ।
ये चात्र प्राणिनः सन्ति सर्वेषां प्राणधारकाः ॥१७॥
वेदागमेन यत्पुण्यं कथितं सेतुबन्धने ।
तत्पुण्यं तु मया देव पाथेये हि समर्पितम् ॥१८॥
यूपं दद्यादिति मन्त्रेण अन्ते चापि तथा ध्वजान् ।
विधिवद्दक्षिणां दद्यात्कुलानि नव पञ्च वा ॥१९॥
पूर्णां दत्त्वा सवित्रेऽर्घ्यं दत्त्वा च स्वगृहं व्रजेत् ।

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||16||
atra gamyatām: sañcaraṇam anveṣaṇam
pratiṣṭhāviśeṣaniyamavarṇanam
sūta uvāca |
vṛkṣādīnām pratiṣṭhāṃ ca uttameṣūttamaṃ caret |
madhyemadhye kaniṣṭhā tu kaniṣṭhaṃ parikīrtitam ||1||
vartulaṃ maṃḍalaṃ kuryāttattu śīrṣe tathāntyake |
madhye vā vedikāṃ kuryāttanmadhye kuṃḍamaṃḍalam ||2||
pūrvedyū rātrisamaye ghaṭaṃ saṃsthāpya pūjayet |
śeṣaṃ saṃpūjya vidhivatpṛthivīṃ ca śivaṃ tathā ||3||
gaṃdhatoyena gāyatryā setuṃ saṃpūjya mokṣayet |
kayāneti ca mantreṇa āpyāyasveti vai ṛcā ||4||
dadyādgandhādikaṃ śrīśca te lakṣmīriti candanam |
dūrvāmantreṇa dūrvāśca phalamantreṇa vai phalam ||5||
śannodevīti mantreṇa dadyātkuśapavitrakam |
surāsureti mantreṇa pradadyādvastrayugmakam ||6||
añjanālaktakaṃ kuryānmanonnā iti saṃpaṭhan|
kuryācchrāddhaṃ paradine vasudhārāpuraḥsaram ||7||
varayedatha ācāryaṃ hotāraṃ nṛvaraścaret |
pātradvayaṃ vidhātavyaṃ sadasyācāryameva ca ||8||
setuyāge vidhātavyaṃ tathā dhānyācalepi ca |
sahasrahome vaikaṃ tu vivāhe brahmaṛtvijau ||9||
yajedenaṃ kṛte mauliyāgārthaṃ yāgamaṃḍapam |
vedimāvāhayetpūrvaṃ maṃḍapaṃ pratipūjayet ||10||
vighnagrahāṃ̐llokapālānsarvasiddhipradāyakān|
sthaṃḍile sarvatobhadre śeṣaṃ viṣṇuṃ pradarśayet ||11||
tatraiva tu varāhākhyaṃ pratītamṛtviguttamam |
sthālīpākena juhuyādaṣṭāviṃśatikatrayam ||12||
ājyena tu varāhasya homapañcakamīritam |
tatastilayavenaiva ekaikāmāhutiṃ kramāt ||13||
baliṃ dadyātpṛthagrūpaṃ śeṣayedvidhipūrvakam |
piṣṭakānnaṃ ghṛtānnaṃ ca vistare vā guḍaudanam ||14||
māṣabhaktaṃ tu lokāya pṛthivyai paramānnakam |
vākyapūrvaṃ sṛjeddhīro vākyaprakaraṇaṃ śṛṇu ||15||
(oṃ̐ adyetyādi ekaviṃśatikulasya
viśiṣṭasvargaprāptaya imaṃ setuṃ saṃkramasametaṃ
viṣṇudaivataṃ surapūjitaṃ vidhivadvāsudevasya
prītaye:'hamutsṛje |)
baddhāṃñjaliḥ paṭhenmantraṃ kuryācca vidhivattataḥ |
picchile patitānāṃ ca udgatenāṅgabhaṅgataḥ |
pratiṣṭhite dharmasetau dharmo me syānna pātakam ||16||
setorasya prabandhasya śraddhayā parayā yutaḥ |
ye cātra prāṇinaḥ santi sarveṣāṃ prāṇadhārakāḥ ||17||
vedāgamena yatpuṇyaṃ kathitaṃ setubandhane |
tatpuṇyaṃ tu mayā deva pātheye hi samarpitam ||18||
yūpaṃ dadyāditi mantreṇa ante cāpi tathā dhvajān |
vidhivaddakṣiṇāṃ dadyātkulāni nava pañca vā ||19||
pūrṇāṃ dattvā savitre:'rghyaṃ dattvā ca svagṛhaṃ vrajet |

| | |
|---|---|
| अनातपे क्षुद्रसेतोः प्रतिष्ठां विधिवच्चरेत् ॥२०॥ | anātape kṣudrasetoḥ pratiṣṭhāṃ vidhivaccaret \|\|20\|\| |
| पूर्वं च दधिवासं च प्रभाते विप्रभोजनम् । | pūrvaṃ ca dadhivāsaṃ ca prabhāte viprabhojanam \| |
| सेतुमध्यं ततो गत्वा गन्धादीन्विधिवच्चरेत् ॥२१॥ | setumadhyaṃ tato gatvā gandhādīnvidhivaccaret \|\|21\|\| |
| विष्णुं शिवं हुताशं च एककुण्डे समर्चयेत् । | viṣṇuṃ śivaṃ hutāśaṃ ca ekakuṇḍe samarcayet \| |
| वास्तोष्पतिं यजेत्तत्र होमं तिलयवेन तु ॥२२॥ | vāstoṣpatiṃ yajettatra homaṃ tilayavena tu \|\|22\|\| |
| कुर्यादेकैकशो विप्रा अष्टा विंशतिसंख्यया । | kuryādekaikaśo viprā aṣṭā viṃśatisaṃkhyayā \| |
| उत्सृज्य दापयेद्धूपं ध्वजवर्ज्यं हि सत्तमाः । | utsṛjya dāpayeddhūpaṃ dhvajavarjyaṃ hi sattamāḥ \| |
| ज्ञातिभिः सह भुञ्जीत कृतकृत्योऽभिधीयते ॥२३॥ | jñātibhiḥ saha bhuñjīta kṛtakṛtyo:'bhidhīyate \|\|23\|\| |

इति श्रीभविष्ये महा पुराणे मध्यमपर्वणि तृतीयभागे षोडशोऽध्यायः ॥१६॥

iti śrībhaviṣye mahā purāṇe madhyamaparvaṇi tṛtīyabhāge ṣoḍaśo:'dhyāyaḥ ||16||

| | |
|---|---|
| भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥१७॥ | bhaviṣyapurāṇam \|\|2\|\| madhyama parva \|\|3\|\| adhyāyaḥ \|\|17\|\| |
| अत्र गम्यताम्: सञ्चरणम् अन्वेषणम् | atra gamyatām: sañcaraṇam anveṣaṇam |
| गोप्रचारविधिवर्णनम् | gopracāravidhivarṇanam |
| सूत उवाच । | sūta uvāca \| |
| तत्र दंडे च विप्रेन्द्राश्चतुरस्रे समंततः । | tatra daṃḍe ca viprendrāścaturasre samaṃtataḥ \| |
| षष्टिहस्तमितां भूमिं तस्य पूर्णां मनोरमाम् ॥१॥ | ṣaṣṭihastamitām bhūmiṃ tasya pūrṇāṃ manoramām \|\|1\|\| |
| प्रचारार्थं गवां चैव यो दद्यात्सुसमाहितः । | pracārārthaṃ gavāṃ caiva yo dadyātsusamāhitaḥ \| |
| षष्टिवर्षसहस्राणि रुद्रलोके महीयते ॥२॥ | ṣaṣṭivarṣasahasrāṇi rudraloke mahīyate \|\|2\|\| |
| तदर्धं च तदर्धं च तदर्धं वा समुत्सृजेत् । | tadardhaṃ ca tadardhaṃ ca tadardhaṃ vā samutsṛjet \| |
| यो दद्यात्केवलां भूमिं कन्यां दासीं तथा वृषम् ॥३॥ | yo dadyātkevalāṃ bhūmiṃ kanyāṃ dāsīṃ tathā vṛṣam \|\|3\|\| |
| अलंकारं विना धेनुं फलस्यार्धं प्रकीर्तितम्। | alaṃkāraṃ vinā dhenuṃ phalasyārdhaṃ prakīrtitam\| |
| अमण्डपे शुभे स्थाने शर्करादिविवर्जिते ॥४॥ | amaṇḍape śubhe sthāne śarkarādivivarjite \|\|4\|\| |
| द्विहस्तवेदिकामध्ये प्रकुर्यात्सेतुमंडपम्। | dvihastavedikāmadhye prakuryātsetumaṃḍapam\| |
| तत्र संपूजयेद्भद्रं ब्रह्माणं च शचीपतिम् ॥५॥ | tatra saṃpūjayedbhadraṃ brahmāṇaṃ ca śacīpatim \|\|5\|\| |
| गणेशं क्षेत्रपालं च शेषं चैव दिगीश्वरान् । | gaṇeśaṃ kṣetrapālaṃ ca śeṣaṃ caiva digīśvarān \| |
| पञ्चोपचारैर्विधिवत्पूजयेत्पायसादिना ॥६॥ | pañcopacārairvidhivatpūjayetpāyasādinā \|\|6\|\| |
| स्थालीपाकेन जुहुयादन्ते वै विप्रभोजनम् । | sthālīpākena juhuyādante vai viprabhojanam \| |
| अत्र यागे श्राद्धवर्ज्यं पूर्वेद्युरधिवासयेत् ॥७॥ | atra yāge śrāddhavarjyaṃ pūrvedyuradhivāsayet \|\|7\|\| |
| त्र्यम्बकेनैव मंत्रेण भूमिं संस्थाप्य पूजयेत् । | tryambakenaiva maṃtreṇa bhūmiṃ saṃsthāpya pūjayet \| |
| तद्विष्णोरिति मंत्रेण गन्धतैलं सचन्दनम् ॥८॥ | tadviṣṇoriti maṃtreṇa gandhatailaṃ sacandanam \|\|8\|\| |
| प्रदद्यादसुनीतेति पुनस्तु नैव स्थापयेत् । | pradadyādasunīteti punastu naiva sthāpayet \| |
| पञ्चगव्येन च पुनः श्रीश्चतेति च पुष्पकम् ॥९॥ | pañcagavyena ca punaḥ śrīścateti ca puṣpakam \|\|9\|\| |
| एवं यूपस्य च तथा अधिगृह्णाति मंत्रकम् । | evaṃ yūpasya ca tathā adhigṛhṇāti maṃtrakam \| |
| गन्धद्वारेति गन्धेन अंशुनातेति तैलकम् ॥१०॥ | gandhadvāreti gandhena aṃśunāteti tailakam \|\|10\|\| |
| सुरासुरेति कुसुमं दूर्वामन्त्रेण दूर्विकाम् । | surāsureti kusumaṃ dūrvāmantreṇa dūrvikām \| |
| प्रभाते पूजयेद्देवान्रुद्रमुद्दिश्य होमयेत् ॥११॥ | prabhāte pūjayeddevānrudramuddiśya homayet \|\|11\|\| |
| स्थालीपाकेन विधिना अन्येषां पूर्ववच्चरेत् । | sthālīpākena vidhinā anyeṣāṃ pūrvavaccaret \| |
| उत्सृज्यारोपयेद्दीपं स्थिरो भवेति वै ऋचा ॥१२॥ | utsṛjyāropayeddīpaṃ sthiro bhaveti vai ṛcā \|\|12\|\| |
| तंत्रेण निर्मितं कुर्यात्सकलं च त्रिहस्तकम् । | taṃtreṇa nirmitaṃ kuryātsakalaṃ ca trihastakam \| |
| हस्तैकं प्रापयेन्मध्ये क्षेत्रे चैव विशेषतः ॥१३॥ | hastaikaṃ prāpayenmadhye kṣetre caiva viśeṣataḥ \|\|13\|\| |
| स्थापयेत्तत्र मन्त्रेण पञ्चगव्येन यत्नतः । | sthāpayettatra mantreṇa pañcagavyena yatnataḥ \| |
| मधुवातेति मधुना आप्यायस्वेति वै दधि ॥१४॥ | madhuvāteti madhunā āpyāyasveti vai dadhi \|\|14\|\| |
| तद्विष्णोरिति मन्त्रेण घटतोयैरनन्तरम् । | tadviṣṇoriti mantreṇa ghaṭatoyairanantaram \| |
| पृथिवीं च वराहं च कूर्ममाधवशक्तिकान् ॥१५॥ | pṛthivīṃ ca varāhaṃ ca kūrmamādhavaśaktikān \|\|15\|\| |
| वास्तोष्पतिं च विष्णुं च यूपे संपूजयेत्क्रमात्। | vāstoṣpatiṃ ca viṣṇuṃ ca yūpe saṃpūjayetkramāt\| |
| दद्यादर्घ्यं च विवरे गर्ते होमं विवर्जयेत् ॥१६॥ | dadyādarghyaṃ ca vivare garte homaṃ vivarjayet \|\|16\|\| |
| अर्घ्यपात्रे च दुष्टे च हस्तेनोत्सृज्य सत्तमाः । | arghyapātre ca duṣṭe ca hastenotsṛjya sattamāḥ \| |
| (ॐ अद्येत्यादि गोब्राह्मणसर्वसत्त्वेभ्यः पर्यटनार्थाय | (oṁ adyetyādi gobrāhmaṇasarvasattvebhyaḥ paryaṭanārthāya |
| इमां भूमिं सुपूजितां विष्णुदैवतां गोप्रचाररूपिणीं | imāṃ bhūmiṃ supūjitāṃ viṣṇudaivatāṃ gopracārarūpiṇīṃ |
| श्रुतिस्मृत्याद्युक्तफलप्राप्तयेऽहमुत्सृजे ।) | śrutismṛtyādyuktaphalaprāptaye:'hamutsṛje \|) |
| शिवलोकस्थिता गावः सर्वदेवैः सुपूजिताः । | śivalokasthitā gāvaḥ sarvadevaiḥ supūjitāḥ \| |
| एवं निवेदयेद्विप्रो गोप्रचारं समाहितः । | evaṃ nivedayedvipro gopracāraṃ samāhitaḥ \| |
| स मुक्तः सर्वपापेभ्यो विष्णुलोके महीयते ॥१७॥ | sa muktaḥ sarvapāpebhyo viṣṇuloke mahīyate \|\|17\|\| |
| यावंति तृणगुल्मानि संति भूमौ शुभानि च । | yāvaṃti tṛṇagulmāni saṃti bhūmau śubhāni ca \| |
| तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥१८॥ । | tāvadvarṣasahasrāṇi svargaloke mahīyate \|\|18\|\| \| |

इति श्रीभविष्ये महापुराणे तृतीयभागे गोप्रचारविधौ सप्तदशोऽध्यायः ॥१७॥

iti śrībhaviṣye mahāpurāṇe tṛtīyabhāge gopracāravidhau saptadaśo:'dhyāyaḥ ||17||

| | |
|---|---|
| भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥१८॥ | bhaviṣyapurāṇam \|\|2\|\| madhyama parva \|\|3\|\| adhyāyaḥ \|\|18\|\| |
| अत्र गम्यताम्: सञ्चरणम् अन्वेषणम् | atra gamyatām: sañcaraṇam anveṣaṇam |
| दिनैकसाध्यप्रतिष्ठाविधानवर्णनम् | dinaikasādhyapratiṣṭhāvidhānavarṇanam |
| सूत उवाच । | sūta uvāca \| |
| कलौ चैकाहसाध्येन प्रतिष्ठामल्पवित्तवान् । | kalau caikāhasādhyena pratiṣṭhāmalpavittavān \| |
| सद्योधिवासमाज्येन प्रकुर्यात्तांत्रिकोत्तमः ॥१॥ | sadyodhivāsamājyena prakuryāttāṃtrikottamaḥ \|\|1\|\| |
| उत्तरं तु गते हंसे अतीते चोत्तरायणे । | uttaraṃ tu gate haṃse atīte cottarāyaṇe \| |
| शरत्काले व्यतीते तु वसंते यज्ञमारभेत् ॥२॥ | śaratkāle vyatīte tu vasaṃte yajñamārabhet \|\|2\|\| |
| नारायणादिमूर्तीनां द्वात्रिंशद्भेद एव तु । | nārāyaṇādimūrtīnāṃ dvātriṃśadbheda eva tu \| |
| प्रतिष्ठां प्रतिमानां च गजास्यादींश्च सत्तमाः ॥३॥ | pratiṣṭhāṃ pratimānāṃ ca gajāsyādīṃśca sattamāḥ \|\|3\|\| |
| नित्यं निर्वर्त्य मतिमान्कुर्यादभ्युदयं ततः । | nityaṃ nirvartya matimānkuryādabhyudayaṃ tataḥ \| |
| विप्रान्संभोजयेद्वाथ ततो यागगृहं व्रजेत् ॥४॥ | viprānsaṃbhojayedvātha tato yāgagṛhaṃ vrajet \|\|4\|\| |
| गणेश ग्रहदिक्पालान्प्रतिकुंभेषु पूजयेत् । | gaṇeśa grahadikpālānpratikuṃbheṣu pūjayet \| |
| स्थंडिले पूजयेद्विष्णुं परिवारगणं यजेत् ॥५॥ | sthaṃḍile pūjayedviṣṇuṃ parivāragaṇaṃ yajet \|\|5\|\| |
| स्नापयेत्प्रथमं देवं तोयैः पञ्चविधैरपि । | snāpayetprathamaṃ devaṃ toyaiḥ pañcavidhairapi \| |
| पञ्चामृतैः पञ्चगव्यैः पंचमृत्पिण्डकैरपि ॥६॥ | pañcāmṛtaiḥ pañcagavyaiḥ paṃcamṛtpiṇḍakairapi \|\|6\|\| |
| तिलतैलैश्च स्नेहैश्च कषायैरपि सत्तमाः । | tilatailaiśca snehaiśca kaṣāyairapi sattamāḥ \| |
| पञ्चपुष्पोदकैर्वाथ त्रिपदैरपि सत्तमाः ॥७॥ | pañcapuṣpodakairvātha tripadairapi sattamāḥ \|\|7\|\| |
| तुलसीकुसुमापुष्पपत्राण्याहुस्त्रिपत्रकम् । | tulasīkusumāpuṣpapatrāṇyāhustripatrakam \| |
| पञ्चकाम्रशमीपद्मकरवीरं च पंचकम् ॥८॥ | pañcakāmraśamīpadmakaravīraṃ ca paṃcakam \|\|8\|\| |
| मृत्तिका करिदंतस्य तथाश्वखुरमृत्तिका । | mṛttikā karidaṃtasya tathāśvakhuramṛttikā \| |
| गोमूत्रं गोमयं क्षीरं दधि सर्पिस्तु पंचमम् । ॥९॥ | gomūtraṃ gomayaṃ kṣīraṃ dadhi sarpistu paṃcamam \| \|\|9\|\| |
| कुर्यात्प्राणप्रतिष्ठां च होमं कुर्याद्यथाविधि । | kuryātprāṇapratiṣṭhāṃ ca homaṃ kuryādyathāvidhi \| |
| दक्षिणां विधिवद्दद्यात्पूर्णां तु तदनंतरम् ॥१०॥ | dakṣiṇāṃ vidhivaddadyātpūrṇāṃ tu tadanaṃtaram \|\|10\|\| |

इति श्रीभविष्ये महापुराणे मध्यम पर्वणि तृतीयभागेऽष्टादशोऽध्यायः ॥१८॥

iti śrībhaviṣye mahāpurāṇe madhyama parvaṇi tṛtīyabhāge:'ṣṭādaśo:'dhyāyaḥ \|\|18\|\|

भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥१९॥
अत्र गम्यताम्: सञ्चरणम् अन्वेषणम्
देवादिप्रतिष्ठावर्णनम्
सूत उवाच ।
अतः परं तु विप्रेन्द्राः काल्यादीनां तथैव च ।
अधिवास्य च पूर्वेद्युः श्राद्धमभ्युदयात्मकम् ॥१॥
प्रथमे जलजैः स्नानं पञ्चगव्यैरनंतरम् ।
पूर्ववच्च विधानेन कुंभे दुर्गां समर्चयेत् ॥२॥
पञ्चामृतैः पञ्चगव्यैः करीषशतधारया ।
श्रीबिल्वे पूजयेद्देवीं दद्यात्प्राणमनंतरम् ॥३॥
बिल्वपत्रैः फलैर्वापि दद्याच्चापि शताहुतीः ।
एकैकशस्तु सर्वेषां दद्यात्काञ्चन दक्षिणाम् ॥४॥
प्रतिमां कालिकायाश्च तारायाश्च पृथक्पृथक् ।
ग्राह्यं विनार्चयेद्विप्राः पञ्चपञ्चशतैरपि ॥५॥
भोजयेत्स्नापयेद्देवो गंधतोयैर्दिनत्रयम् ।
ताम्रकुंभेऽर्चयेद्देवीं त्रिदिनं प्रातरेव हि ॥६॥
समीरणं ततो दद्यात्पेटिकायां निवेशयेत् ।
ततोऽपि गन्धतोयैश्च स्नापयेत्कन्यकादिभिः। ॥७॥
ततो वै चाष्टमदिने रात्रावपि प्रपूजयेत् ।
पशुदानं प्रकर्तव्यमग्निकार्यं च पायसैः ॥८॥
शिवलिङ्गप्रतिष्ठां च वक्ष्ये तंत्रमतं यथा ।
त्रिविप्रं भोजयेद्विप्रा अधिवास्यं विशेषतः ॥९॥
नित्यं समाप्य च पुनः कुर्यादभ्युदयं ततः ।
आचार्यं वरयेत्प्रातः स्नापयेत्पूर्ववर्त्मना ॥१०॥
परिवारगणैः सार्द्धमर्चयेत्तदनंतरम् ।
दद्यात्समीरणं पश्चादग्निकार्यं समाचरेत् ॥११॥
तिलहेममयीं गां च दद्याद्गां च विधानतः ।
न नाम न च गोत्रं च होमकर्मणि सर्वदा ॥१२॥
पूर्णिमायां विशेषेण नान्येषां च कथंचन ।
होमांते वसुधारां च कुंभे दत्त्वा विधानतः ॥१३॥
त्रिहस्तचरकायं च हस्तैकं चतुर्हस्तके ।
शालशमशिलायाश्च प्रतिष्ठां विधिवच्चरेत् ॥१४॥
सद्योधिवासयेद्देवं द्वादश्यां स्नापयेदथ ।
रत्नतोयैः परिमलैस्त्रिगंधैः पंचपल्लवैः ॥१५॥
कुंभे प्रजापतिं स्थाप्य श्वेताब्जं नवनाभके ।
नवदुर्गोक्तमार्गेण पूजयेत्परमेश्वरम् ॥१६॥
चक्रस्वरूपतो ज्ञेयं प्रदद्याच्च समीरणम् ।
आनीय ताम्रभांडे च त्रिकालं प्रतिपूजयेत् ॥१७॥
पायसान्नैरुत्पलैर्वा पङ्कजैर्वापि होमयेत् ।
सकाञ्चनं वस्त्रयुग्मं प्रद द्याद्भूरिदक्षिणम् ॥१८॥
श्रीसूर्यस्य गणेशस्य विरिञ्चेश्चापि सत्तमाः ।
वटवृक्षांतिकं गत्वा स्थापयेद्वरुणं ततः ॥१९॥
रक्ताब्जे पूजयेत्सूर्यं परिवारसमन्वितम् ।
अष्टाविंशतिभिर्द्दत्त्वा दद्यात्प्राणमनंतरम् ॥२०॥
एकाहमथवाकाशे गुप्तं कृत्वा दिनत्रयम् ।
त्र्यहादेव पुनः पूजां पुनर्होमं समाचरेत् ॥२१॥
पुनश्च भोजयेद्विप्रान्दद्यात्काञ्चनदक्षिणाम् ।
वाराह्यास्त्रिपुरायाश्च नारिकेलोदकैरपि ॥२२॥

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||19||
atra gamyatām: sañcaraṇam anveṣaṇam
devādipratiṣṭhāvarṇanam
sūta uvāca |
ataḥ paraṃ tu viprendrāḥ kālyādīnāṃ tathaiva ca |
adhivāsya ca pūrvedyuḥ śrāddhamabhyudayātmakam ||1||
prathame jalajaiḥ snānaṃ pañcagavyairanaṃtaram |
pūrvavacca vidhānena kuṃbhe durgāṃ samarcayet ||2||
pañcāmṛtaiḥ pañcagavyaiḥ karīṣaśatadhārayā |
śrībilve pūjayeddevīṃ dadyātprāṇamanaṃtaram ||3||
bilvapatraiḥ phalairvāpi dadyāccāpi śatāhutīḥ |
ekaikaśastu sarveṣāṃ dadyātkāñcana dakṣiṇām ||4||
pratimāṃ kālikāyāśca tārāyāśca pṛthakpṛthak |
grāhyaṃ vinārcayedviprāḥ pañcapañcaśatairapi ||5||
bhojayetsnāpayeddevo gaṃdhatoyairdinatrayam |
tāmrakuṃbhe:'rcayeddevīṃ tridinaṃ prātareva hi ||6||
samīraṇaṃ tato dadyātpeṭikāyāṃ niveśayet |
tato:'pi gandhatoyaiśca snāpayetkanyakādibhiḥ| ||7||
tato vai cāṣṭamadine rātrāvapi prapūjayet |
paśudānaṃ prakartavyamagnikāryaṃ ca pāyasaiḥ ||8||
śivaliṅgapratiṣṭhāṃ ca vakṣye taṃtramataṃ yathā |
trivipraṃ bhojayedviprā adhivāsyaṃ viśeṣataḥ ||9||
nityaṃ samāpya ca punaḥ kuryādabhyudayaṃ tataḥ |
ācāryaṃ varayetprātaḥ snāpayetpūrvavartmanā ||10||
parivāragaṇaiḥ sārddhamarcayettadanaṃtaram |
dadyātsamīraṇaṃ paścādagnikāryaṃ samācaret ||11||
tilahemamayīṃ gāṃ ca dadyādgāṃ ca vidhānataḥ |
na nāma na ca gotraṃ ca homakarmaṇi sarvadā ||12||
pūrṇimāyāṃ viśeṣeṇa nānyeṣāṃ ca kathaṃcana |
homāṃte vasudhārāṃ ca kuṃbhe dattvā vidhānataḥ ||13||
trihastacarakāyaṃ ca hastaikaṃ caturhastake |
śālaśamaśilāyāśca pratiṣṭhāṃ vidhivaccaret ||14||
sadyodhivāsayeddevaṃ dvādaśyāṃ snāpayedatha |
ratnatoyaiḥ parimalaistrigaṃdhaiḥ paṃcapallavaiḥ ||15||
kuṃbhe prajāpatiṃ sthāpya śvetābjaṃ navanābhake |
navadurgoktamārgeṇa pūjayetparameśvaram ||16||
cakrasvarūpato jñeyaṃ pradadyācca samīraṇam |
ānīya tāmrabhāṃḍe ca trikālaṃ pratipūjayet ||17||
pāyasānnairutpalairvā paṅkajairvāpi homayet |
sakāñcanaṃ vastrayugmaṃ prada dyādbhūridakṣiṇam ||18||
śrīsūryasya gaṇeśasya viriñceścāpi sattamāḥ |
vaṭavṛkṣāṃtikaṃ gatvā sthāpayedvaruṇaṃ tataḥ ||19||
raktābje pūjayetsūryaṃ parivārasamanvitam |
aṣṭāviṃśatibhirddattvā dadyātprāṇamanaṃtaram ||20||
ekāhamathavākāśe guptaṃ kṛtvā dinatrayam |
tryahādeva punaḥ pūjāṃ punarhomaṃ samācaret ||21||
punaśca bhojayedviprāndadyātkāñcanadakṣiṇām |
vārāhyāstripurāyāśca nārikelodakairapi ||22||

| | |
|---|---|
| स्थापयेद्वा विधानेन सिन्दूराद्यैः समर्चयेत् । | sthāpayedvā vidhānena sindūrādyaiḥ samarcayet \| |
| दद्यात्समीरणं पश्चात्पुनः पूजां च होमयेत् ॥२३॥ | dadyātsamīraṇaṃ paścātpunaḥ pūjāṃ ca homayet \|\|23\|\| |
| पशुज्ञानं च कर्तव्यं षण्मासैः पञ्चमोदकैः । | paśujñānaṃ ca kartavyaṃ ṣaṇmāsaiḥ pañcamodakaiḥ \| |
| कुमारीं भोजयेद्रात्रौ दद्यात्काञ्चन दक्षिणाम् ॥२४॥ | kumārīṃ bhojayedrātrau dadyātkāñcana dakṣiṇām \|\|24\|\| |
| प्रतिमां भुवनेशीं च महामायाम्बिकामपि । | pratimāṃ bhuvaneśīṃ ca mahāmāyāmbikāmapi \| |
| कामाक्षीं च ततो देवीमिन्द्राक्षीं चापराजिताम् ॥२५॥ | kāmākṣīṃ ca tato devīmindrākṣīṃ cāparājitām \|\|25\|\| |
| पूर्वेद्यू रात्रिसमये पिष्ट काष्टौ निवेदयेत् । | pūrvedyū rātrisamaye piṣṭa kāṣṭau nivedayet \| |
| अष्टौ निर्माणयेत्पश्चाद्बलिं चाष्टौ विधानवित् ॥२६॥ | aṣṭau nirmāṇayetpaścādbaliṃ cāṣṭau vidhānavit \|\|26\|\| |
| परिवारगणैः सार्द्धं पूजयेत्प्रयतः सुधीः । | parivāragaṇaiḥ sārddhaṃ pūjayetprayataḥ sudhīḥ \| |
| समीरणं ततो दद्याच्छिवं सूर्यं यजेत्पुनः ॥२७॥ | samīraṇaṃ tato dadyācchivaṃ sūryaṃ yajetpunaḥ \|\|27\|\| |
| पायसान्नैश्च जुहुयात्त्रिदिनं लिपिपूजनम् । | pāyasānnaiśca juhuyāttridinaṃ lipipūjanam \| |
| कुमारीपूजनं कुर्यादग्निकार्यं दिनत्रयम् ॥२८॥ | kumārīpūjanaṃ kuryādagnikāryaṃ dinatrayam \|\|28\|\| |
| पशुदानं च कर्तव्यं विभवे सति सत्तमाः । | paśudānaṃ ca kartavyaṃ vibhave sati sattamāḥ \| |
| रात्रौ जागरणं कुर्यान्मठोत्सवपुरःसरम् ॥२९॥ | rātrau jāgaraṇaṃ kuryānmaṭhotsavapuraḥsaram \|\|29\|\| |

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे एकोनविंशोऽध्यायः ॥१९॥

iti śrībhaviṣye mahāpurāṇe madhyamaparvaṇi tṛtīyabhāge ekonaviṃśo:'dhyāyaḥ ||19||

भविष्यपुराणम् ॥२॥ मध्यम पर्व ॥३॥ अध्यायः ॥२०॥
अत्र गम्यताम्: सञ्चरणम् अन्वेषणम्
ग्रहोपद्रवोत्पातशान्तिवर्णनम्
सूत उवाच ।
दुर्निमित्तान्यथो वक्ष्ये श्रृण्वंतु मुनिसत्तमाः ।
यस्य ये ग्रहदोषाः स्युस्तेषां शांतिं यथाक्रमात् ॥१॥
दिव्यंतरिक्षे भौमे चेत्येवं त्रिः परिकीर्तितम् ।
ग्रहर्क्षाद्यैः कृतं दिव्यमान्तरिक्षं निबोध मे ॥२॥
उल्काहितो दिशो दाहः परिवेषस्तथैव च ।
जलाशयानां वै कृत्यं भौमं तदपि कीर्तितम् ॥३॥
भौमं चाल्पफलं ज्ञेयं दिव्यान्तरिक्षमेव च ।
सप्ताहमफलं दद्याद्दैवं चापि च तत्क्षणात् ॥४॥
देवानां हसनं चैव कल्कनं रुधिरस्रवः ।
अकस्माद्व्यसनं तत्र यत्र निर्घातनिर्दयः ।
सर्पाद्यारोहणं चैव दैवं तदपि कीर्तितम् ॥५॥
ततो मेघात्समुत्पन्ना यदि वृष्टिः शिलातले ।
सप्ताहाभ्यंतरे जीवमुत्पन्नं निष्फलं भवेत् ॥६॥
एकराशिस्थिताः पापाः शनिभौमदिवाकराः ।
पृथ्वी धूमाकुला तत्र रुदंति बहवो जनाः ॥७॥
अभिचारं गते जीवे शनौ च तत्र नागते ।
तत्र पश्यति राजेन्द्रः को धरां धारयिष्यति ॥८॥
सूर्यमपश्यनो द्वंद्वं दिग्दाहश्च तथैव च ।
दर्शनं धूमकेतोश्च नक्षत्रे धूमदर्शनम् ॥९॥
भूकम्प एव मासे च एकमासे तथा दिने ।
राज्ञो जन्मदिने वाथ शक्रचापं दिनांतरे ॥१०॥
दर्शनं खरवातस्य ग्रहयुद्धस्य दर्शनम् ।
मासत्रये तु ग्रहणमुल्कापातप्रपातनम् ॥११॥
आकाशेऽप्यथ भूमौ च तत्र मण्डूकमेव च ।
हरिद्रावृष्टिः पाषाणे सिंहबिल्वाकृतिर्यदि ।
दर्शने राष्ट्रदुर्भिक्षमकरं नृपतिक्षयः ॥१२॥
चैत्रे कुम्भे नदीवेगदर्शने विप्लवो भवेत् ।
अर्क स्याद्भुतमेतद्धि स्रुग्युक्तं श्रपयेच्चरुम् ॥१३॥
आकृष्णेनेति मन्त्रेण अथ वार्केण यत्नतः ।
प्रासादतोरणं तत्र द्वारं प्राकारवेश्म च ॥१४॥
धान्यसारं गवां सारं कूपे कुम्भप्रदर्शनम् ।
आदित्यस्याद्भुतं विद्यात्कमलं जुहुयात्ततः ॥१५॥
सहस्रं जुहुयाद्वाथ ततः शांतिर्भवेद्ध्रुवम् ।
विकृताः पक्षिणश्चैव पांडुकपोतकास्ततः ॥१६॥
श्वेतोलूको बृहंश्चैव द्रोणकाकश्च कोकिलः ।
क्रौंचश्च वर्द्धनी चैव निपतंति गृहे यदि ॥१७॥
गृहे तस्य महोत्पातो भविष्यति न संशयः ।
स्थूलभङ्गप्रग्रहणं प्ररोहणमथापि वा ॥१८॥
हाराः कटकटायंते जातस्य दंतसम्भवः ।
हसता देवतानां च गात्रे स्वेदश्च जायते ।
सर्पमण्डूकप्रसवः कुंभे वापि क्वचिद्भवेत् ॥१९॥
निमित्तान्येवमादीनि जायंते यस्य वेश्मनि ।
षड्भिर्मासैश्च म्रियते गृहिणी च शुभा च या ॥२०॥
अशनिः पतते यत्र गृहे वज्रं च पादपे ।

bhaviṣyapurāṇam ||2|| madhyama parva ||3|| adhyāyaḥ ||20||
atra gamyatām: sañcaraṇam anveṣaṇam
grahopadravotpātaśāntivarṇanam
sūta uvāca |
durnimittānyatho vakṣye śrṇvaṃtu munisattamāḥ |
yasya ye grahadoṣāḥ syusteṣāṃ śāṃtiṃ yathākramāt ||1||
divyaṃtarikṣe bhaume cetyevaṃ triḥ parikīrtitam |
graharkṣādyaiḥ kṛtaṃ divyamāntarikṣaṃ nibodha me ||2||
ulkāhito diśo dāhaḥ pariveṣastathaiva ca |
jalāśayānāṃ vai kṛtyaṃ bhaumaṃ tadapi kīrtitam ||3||
bhaumaṃ cālpaphalaṃ jñeyaṃ divyāntarikṣameva ca |
saptāhamaphalaṃ dadyāddaivaṃ cāpi ca tatkṣaṇāt ||4||
devānāṃ hasanaṃ caiva kalkanaṃ rudhirasravaḥ |
akasmādvyasanaṃ tatra yatra nirghātanirdayaḥ |
sarpādyārohaṇaṃ caiva daivaṃ tadapi kīrtitam ||5||
tato meghātsamutpannā yadi vṛṣṭiḥ śilātale |
saptāhābhyaṃtare jīvamutpannaṃ niṣphalaṃ bhavet ||6||
ekarāśisthitāḥ pāpāḥ śanibhaumadivākarāḥ |
pṛthvī dhūmākulā tatra rudaṃti bahavo janāḥ ||7||
abhicāraṃ gate jīve śanau ca tatra nāgate |
tatra paśyati rājendraḥ ko dharāṃ dhārayiṣyati ||8||
sūryamapaśyano dvaṃdvaṃ digdāhaśca tathaiva ca |
darśanaṃ dhūmaketośca nakṣatre dhūmadarśanam ||9||
bhūkampa eva māse ca ekamāse tathā dine |
rājño janmadine vātha śakracāpaṃ dināṃtare ||10||
darśanaṃ kharavātasya grahayuddhasya darśanam |
māsatraye tu grahaṇamulkāpātaprapātanam ||11||
ākāśe:'pyatha bhūmau ca tatra maṇḍūkameva ca |
haridrāvṛṣṭiḥ pāṣāṇe siṃhabilvākṛtiryadi |
darśane rāṣṭradurbhikṣamakaraṃ nṛpatikṣayaḥ ||12||
caitre kumbhe nadīvegadarśane viplavo bhavet |
arka syādbhutametaddhi srugyuktaṃ śrapayeccarum ||13||
ākṛṣṇeneti mantreṇa atha vārkeṇa yatnataḥ |
prāsādatoraṇaṃ tatra dvāraṃ prākāraveśma ca ||14||
dhānyasāraṃ gavāṃ sāraṃ kūpe kumbhapradarśanam |
ādityasyādbhutaṃ vidyātkamalaṃ juhuyāttataḥ ||15||
sahasraṃ juhuyādvātha tataḥ śāṃtirbhaveddhruvam |
vikṛtāḥ pakṣiṇaścaiva pāṃḍukapotakāstataḥ ||16||
śvetolūko bṛhaṃścaiva droṇakākaśca kokilaḥ |
krauṃcaśca varddhanī caiva nipataṃti gṛhe yadi ||17||
gṛhe tasya mahotpāto bhaviṣyati na saṃśayaḥ |
sthūlabhaṅgapragrahaṇaṃ prarohaṇamathāpi vā ||18||
hārāḥ kaṭakaṭāyaṃte jātasya daṃtasambhavaḥ |
hasatā devatānāṃ ca gātre svedaśca jāyate |
sarpamaṇḍūkaprasavaḥ kuṃbhe vāpi kvacidbhavet ||19||
nimittānyevamādīni jāyaṃte yasya veśmani |
ṣaḍbhirmāsaiśca mriyate gṛhiṇī ca śubhā ca yā ||20||
aśaniḥ patate yatra gṛhe vajraṃ ca pādape |

शुक्ला वह्निस्फुलिंगाश्च तस्य विद्धि महद्भयम् ॥२१॥
खर्जूर उदरावर्ते निकोचगरलेऽपि च ।
फलिवृक्षे तिन्दुके च यत्र निर्जायते क्वचित् ॥२२॥
उद्याने देवगेहे च स्वगृहे चैत्यवृक्षके ।
कुर्यादादित्यवारे वा अयुतं तिलपायसम् ।
ततः शांतिर्भवेदाशु धेनुं दद्याच्च दक्षिणाम् ॥२३॥
पायसं तिलमुद्गौ च पुष्पं वा तालवृन्तकम् ।
इक्षुमोदकपिण्याकाञ्जुहुयाद्रविमुद्दिशन् ॥२४॥
सिंहासनं रथच्छत्रं ध्वजश्चामरभूषिते ।
अकस्माद्दृश्यते यत्र राज्ञो वान्यत्र कुत्रचित् ॥२५॥
नदयंति च सत्यस्योज्ज्वलनं स्त्रीपुरुषयोः ।
आगमस्य च दृष्ट्वैव भंगः कटकटायनम् ॥२६॥
उपरिष्टाद्भवेद्यस्य महोत्पातो भवेदयम् ।
चलत्वं चाधरस्यापि तथा कटकटायनम् ॥२७॥
रुदितं कोकिलस्यापि उलूकोप्यशुभं वदेत् ।
राजामात्यविनाशाय महीं च तत्सुतोऽपि वा ।
हस्तिनो मदयुक्ताश्च म्रियंते नात्र संशयः ॥२८॥
ताडीपूगादयो यत्र यमौ स्यातां प्रमादतः ।
गेही तत्र विनश्येत सदारः पुत्रसंयुतः ॥२९॥
बद्धपुष्पे यदा पुष्पं फलं वा यदि दृश्यते ।
अक्षतादर्शनात्तत्र सोमस्याद्भुतदर्शनम् ।
दधि मधु घृतं चैव जुहुयादयुतं द्विजाः ॥३०॥
पालाशं सोममुद्दिश्य सोमस्य च भवेद्दिने ।
इमंदेवा इति मंत्रेण सोमाय श्रपयेच्चरुम् ॥३१॥
उत्पतंति गृहे यस्य यवा माषाश्च पुष्कलाः ।
दधिक्षीराज्यपाकेषु रुधिरं दृश्यते यदि ॥३२॥
अकस्माद्गृहदाहस्तु अनग्निज्वलनं यथा ।
मेघहीना भवेद्विद्युद्वृषस्योद्गमनं तथा ॥३३॥
व्याधिलीना विनश्यंति निखिलाः पशुमानुषाः ।
एवं सर्वाणि भूतानि भवंत्यकारके ध्रुवम् ॥३४॥
राजामात्यविनाशाय गेहे गेही विनश्यति ।
प्राणनाशाय विप्रायाहुत्या च प्रभवंति हि ॥३५॥
दृष्ट्वा वाभद्रमत्युग्रं जुहुयादयुतं क्रमात् ।
दधिमधुघृतैर्युक्तं खादिरोदुम्बरेऽपि च ॥३६॥
अग्निर्मूर्द्धेंति मंत्रेण श्रपितं लोहितं चरुम् ।
त्रिविप्रान्भोजयेद्दद्याद्दक्षिणां लोहितं ततः ।
स्वर्णमंगारमुद्दिश्य ततः शांतिः प्रजायते ॥३७॥
पुष्पं वा पातयेद्यत्र फलं वापि तथैव च ।
दध्यन्नं च घृतैर्मिश्रं रौप्यं हिरण्यमेव च ॥३८॥
हस्त्यश्वमहिषा गावो दारापत्यधनानि च ।
तुष्टेनांगारकेणैव सर्वमेतत्प्रदीयताम्।
आंगारकेण मंत्रेण खादिरं चाक्षतैर्युतम्। ॥३९॥
दक्षिणां च यथाशक्ति दद्याद्विप्राय वा पुनः ।
लोहितं च बलिं दद्यात्ततः संपद्यते शुभम् ॥४०॥
धावंति चोर्ध्वपुच्छाश्च गृहे गावः स्वयं यदि ।
आरोहंति गृहं विप्राः सारमेयाश्च सूकराः ॥४१॥
गृहे यस्य भवंत्येते तस्य भार्या विनश्यति ।
सर्वेषां वा भवेन्मृत्युर्वंध्या गौर्वा प्रजायते ॥४२॥

śuklā vahnisphulimˌgāśca tasya viddhi mahadbhayam ||21||
kharjūra udarāvarte nikocagarale:'pi ca |
phalivṛkṣe tinduke ca yatra nirjāyate kvacit ||22||
udyāne devagehe ca svagṛhe caityavṛkṣake |
kuryādādityavāre vā ayutaṃ tilapāyasam |
tataḥ śāṃtirbhavedāśu dhenuṃ dadyācca dakṣiṇām ||23||
pāyasaṃ tilamudgau ca puṣpaṃ vā tālavṛntakam |
ikṣumodakapiṇyākāñjuhuyādravimuddiśan ||24||
siṃhāsanaṃ rathacchatraṃ dhvajaścāmarabhūṣite |
akasmāddṛśyate yatra rājño vānyatra kutracit ||25||
nadayaṃti ca satyasyojjvalanaṃ strīpuruṣayoḥ |
āgamasya ca dṛṣṭvaiva bhaṃgaḥ kaṭakaṭāyanam ||26||
upariṣṭādbhavedyasya mahotpāto bhavedayam |
calatvaṃ cādharasyāpi tathā kaṭakaṭāyanam ||27||
ruditaṃ kokilasyāpi ulūkopyaśubhaṃ vadet |
rājāmātyavināśāya mahīṃ ca tatsuto:'pi vā |
hastino madayuktāśca mriyaṃte nātra saṃśayaḥ ||28||
tāḍīpūgādayo yatra yamau syātāṃ pramādataḥ |
gehī tatra vinaśyeta sadāraḥ putrasaṃyutaḥ ||29||
baddhapuṣpe yadā puṣpaṃ phalaṃ vā yadi dṛśyate |
akṣatādarśanāttatra somasyādbhutadarśanam |
dadhi madhu ghṛtaṃ caiva juhuyādayutaṃ dvijāḥ ||30||
pālāśaṃ somamuddiśya somasya ca bhaveddine |
imaṃdevā iti maṃtreṇa somāya śrapayeccarum ||31||
utpataṃti gṛhe yasya yavā māṣāśca puṣkalāḥ |
dadhikṣīrājyapākeṣu rudhiraṃ dṛśyate yadi ||32||
akasmādgṛhadāhastu anagnijvalanaṃ yathā |
meghahīnā bhavedvidyudvṛṣasyodgamanaṃ tathā ||33||
vyādhilīnā vinaśyaṃti nikhilāḥ paśumānuṣāḥ |
evaṃ sarvāṇi bhūtāni bhavaṃtyakārake dhruvam ||34||
rājāmātyavināśāya gehe gehī vinaśyati |
prāṇanāśāya viprāyāhutyā ca prabhavaṃti hi ||35||
dṛṣṭvā vābhadramatyugraṃ juhuyādayutaṃ kramāt |
dadhimadhughṛtairyuktaṃ khādirodumbare:'pi ca ||36||
agnirmūddheṃti maṃtreṇa śrapitaṃ lohitaṃ carum |
triviprānbhojayeddadyāddakṣiṇām lohitaṃ tataḥ |
svarṇamaṃgāramuddiśya tataḥ śāṃtiḥ prajāyate ||37||
puṣpaṃ vā pātayedyatra phalaṃ vāpi tathaiva ca |
dadhyannaṃ ca ghṛtairmiśraṃ raupyaṃ hiraṇyameva ca ||38||
hastyaśvamahiṣā gāvo dārāpatyadhanāni ca |
tuṣṭenāṃgārakeṇaiva sarvametatpradīyatām|
āṃgārakeṇa maṃtreṇa khādiraṃ cākṣatairyutam| ||39||
dakṣiṇām ca yathāśakti dadyādviprāya vā punaḥ |
lohitaṃ ca baliṃ dadyāttataḥ saṃpadyate śubham ||40||
dhāvaṃti cordhvapucchāśca gṛhe gāvaḥ svayaṃ yadi |
ārohaṃti gṛhaṃ viprāḥ sārameyāśca sūkarāḥ ||41||
gṛhe yasya bhavaṃtyete tasya bhāryā vinaśyati |
sarveṣāṃ vā bhavenmṛtyurvaṃdhyā gaurvā prajāyate ||42||

मिथ्यावादेन गेही च राज्ञा वादैश्च तिष्ठति ।
अथ वा यद्गृहे गावो नर्दयंति हसंति च ॥४३॥
धरणीहननं यत्र द्वयोरास्कदनं तथा ।
निमित्तान्येवमादीनि गोश्वजातानि सत्तमाः ॥४४॥
यस्य गेहे भवंत्येते नाशस्तस्य भवेद्ध्रुवम् ।
मण्डूकसर्पकूष्मांडाः प्रसुवंति यथा स्त्रियः ॥४५॥
अकस्माद्यदि चैतानि बुधस्योत्पातलक्षणम् ।
शांतिं तत्र प्रवक्ष्यामि यथा संपद्यते सुखम् ॥४६॥
दधिमधुघृताक्तं च अपामार्गं तथा पुनः ।
अयुतं बुधवारे च जुहुयाच्छ्रद्धया युतः ॥४७॥
अंबकेति च मंत्रेण बुधाय श्रपयेच्चरुम् ।
सुवर्णं बुधमुद्दिश्य गां च दद्यात्पयस्विनीम् ॥४८॥
सुवर्णं पुष्पवृष्टिं च सुफलं चाक्षतं तथा ।
गृहे प्रांगणके यस्य निपतंति कदाचन ॥४९॥
अलंकारयुतां वापि सर्वाभरणभूषिताम् ।
गृहमध्ये तु यः पश्ये त्क्षीणामंतर्हितां स्त्रियम् ॥५०॥
अकस्मान्मालतीपुष्पं जातं स्यात्तस्य वा गृहे ।
सोमाय न च संतुष्टः सर्वमेतत्प्रदृश्यते ॥५१॥
धनं धान्यं तथा पुत्र ऐश्वर्यं च वरस्त्रियः ।
सभृत्याश्च महिष्यश्च मरिष्यंति न संशयः ॥५२॥
श्रीश्चतेति च मन्त्रेण अपामार्गं तथा बुधः ।
सहस्रं बुधवारे च जुहुयाद् घृतसंयुतम् ॥५३॥
पयस्विनीं तथा गां च वासोयुगसमन्वितम् ।
द्विजाय श्रद्धया दद्यात्ततः संपद्यते शुभम्॥५४॥
रक्तस्रावो भवेद्यत्र तत्र ऋत्विक्प्रसूयते ।
सिंहव्याघ्रगवादीनां धनहानिविपत्करः ॥५५॥
एको वृषस्त्रयो गावः सप्ताष्ट नव दंतिनः ।
संवत्सरेण तस्यैका प्रसूतिर्विहता पुनः ॥५६॥
पुनःपुनर्व्रतं चाशु अकाले मैथुनं तथा ।
गावो यत्र प्रसूयंते यमौ दोषकराविमौ ॥५७॥
भुञ्जीकृतानि धान्यानि व्रीहयो यवतंडुलाः ।
ग्राविमार्जारमंडूकाः स्थूणाभंगे च प्राङ्गणे ॥५८॥
विकिरंति नखैर्भूमिं प्ररोहंति ग्रहं तथा ।
गृहे यस्य प्रजायंते तस्या मृत्युर्न संशयः ॥५९॥
षण्मासाभ्यन्तरे यत्र श्मशानं यास्यति ध्रुवम् ।
कलहं ज्ञातिवैरं च व्याधिपीडा भविष्यति ॥६०॥
विप्रलापो मित्र नाश इष्टेष्वनिष्टदर्शनम् ।
भार्यापुत्रविनाशश्च भवेदेषु विनिश्चितम् ॥६१॥
क्रियावंतं यदा कुर्वन्कुर्वीत गृध्रबिल्वके ।
तदा राज्ञां विभ्रमश्च तथा गृहविनाशनम् ॥६२॥
अमात्यवर्गाश्च पुरे राज्ञां राज्यपराङ्मुखाः ।
बृहस्पतिं समुद्दिश्य गां च दद्यात्पयस्विनीम् ॥६३॥
वारिमंडे च कूपे च वाप्यां च मधुकांजिके ।
क्षीरं दधिघृतं चैव जातं यदि भविष्यति ॥६४॥
अकस्मात्तत्र वृक्षश्च फलेन सह संयुतः ।
गृहमध्ये प्रजायेत ततः संपद्यते शुभम् ॥६५॥
बृहस्पतेस्तु तुष्टस्य सर्वमेतन्निदर्शनम् ।
गौरं बृहस्पतेश्चैव प्रकुर्यात्प्रायदक्षिणाम् ॥६६॥

mithyāvādena gehī ca rājñā vādaiśca tiṣṭhati |
atha vā yadgṛhe gāvo nardayaṃti hasaṃti ca ||43||
dharaṇīhananaṃ yatra dvayorāskadanaṃ tathā |
nimittānyevamādīni gośvajātāni sattamāḥ ||44||
yasya gehe bhavaṃtyete nāśastasya bhaveddhruvam |
maṇḍūkasarpakūṣmāṃḍāḥ prasuvaṃti yathā striyaḥ ||45||
akasmādyadi caitāni budhasyotpātalakṣaṇam |
śāṃtiṃ tatra pravakṣyāmi yathā saṃpadyate sukham ||46||
dadhimadhughṛtāktaṃ ca apāmārgaṃ tathā punaḥ |
ayutaṃ budhavāre ca juhuyācchraddhayā yutaḥ ||47||
aṃbaketi ca maṃtreṇa budhāya śrapayeccarum |
suvarṇaṃ budhamuddiśya gāṃ ca dadyātpayasvinīm ||48||
suvarṇaṃ puṣpavṛṣṭiṃ ca suphalaṃ cākṣataṃ tathā |
gṛhe prāṃgaṇake yasya nipataṃti kadācana ||49||
alaṃkārayutāṃ vāpi sarvābharaṇabhūṣitām |
gṛhamadhye tu yaḥ paśye tkṣīṇāmaṃtarhitāṃ striyam ||50||
akasmānmālatīpuṣpaṃ jātaṃ syāttasya vā gṛhe |
somāya na ca saṃtuṣṭaḥ sarvametatpradṛśyate ||51||
dhanaṃ dhānyaṃ tathā putra aiśvaryaṃ ca varastriyaḥ |
sabhṛtyāśca mahiṣyaśca mariṣyaṃti na saṃśayaḥ ||52||
śrīścateti ca mantreṇa apāmārgaṃ tathā budhaḥ |
sahasraṃ budhavāre ca juhuyād ghṛtasaṃyutam ||53||
payasvinīṃ tathā gāṃ ca vāsoyugasamanvitam |
dvijāya śraddhayā dadyāttataḥ saṃpadyate śubham||54||
raktasrāvo bhavedyatra tatra ṛtvikprasūyate |
siṃhavyāghragavādīnāṃ dhanahānivipatkaraḥ ||55||
eko vṛṣastrayo gāvaḥ saptāṣṭa nava daṃtinaḥ |
saṃvatsareṇa tasyaikā prasūtirvihatā punaḥ ||56||
punaḥpunarvrataṃ cāśu akāle maithunaṃ tathā |
gāvo yatra prasūyaṃte yamau doṣakarāvimau ||57||
bhuñjīkṛtāni dhānyāni vrīhayo yavataṃḍulāḥ |
grāvimārjāramaṃḍūkāḥ sthūṇābhaṃge ca prāṅgaṇe ||58||
vikiraṃti nakhairbhūmiṃ prarohaṃti grahaṃ tathā |
gṛhe yasya prajāyaṃte tasyā mṛtyurna saṃśayaḥ ||59||
ṣaṇmāsābhyantare yatra śmaśānaṃ yāsyati dhruvam |
kalahaṃ jñātivairaṃ ca vyādhipīḍā bhaviṣyati ||60||
vipralāpo mitra nāśa iṣṭeṣvaniṣṭadarśanam |
bhāryāputravināśaśca bhavedeṣu viniścitam ||61||
kriyāvaṃtaṃ yadā kurvankurvīta gṛdhrabilvake |
tadā rājñāṃ vibhramaśca tathā gṛhavināśanam ||62||
amātyavargāśca pure rājñāṃ rājyaparāṅmukhāḥ |
bṛhaspatiṃ samuddiśya gāṃ ca dadyātpayasvinīm ||63||
vārimaṃḍe ca kūpe ca vāpyāṃ ca madhukāṃjike |
kṣīraṃ dadhighṛtaṃ caiva jātaṃ yadi bhaviṣyati ||64||
akasmāttatra vṛkṣaśca phalena saha saṃyutaḥ |
gṛhamadhye prajāyeta tataḥ saṃpadyate śubham ||65||
bṛhaspatestu tuṣṭasya sarvametannidarśanam |
gauraṃ bṛhaspateścaiva prakuryātprāyadakṣiṇām ||66||

अशुभं हि शुभेनैव शांतिं होमं च कारयेत् ।
तत्रैव राक्षसं यत्र घटकं परिशोषणम् ॥६७॥
केसरी शर्करा तैलं राजतं तांडवं स्थितम् ।
माषभक्तं तथा धान्यं सुवर्णं रजतानि च ॥६८॥
ताम्रं कांस्यं तथा लोहं सीसकं पित्तलं तथा ।
स्थापितानीव दृश्यंते गृहे चैतानि यस्य वै ॥६९॥
धननाशो भवेत्तस्य स्वर्ग भंगो ह्यथापि वा ।
व्याधिपीडे तथा घोरे राजोपद्रवबंधने ।
गजाश्वपशुभृत्यानां विनाशो जायते ध्रुवम् ॥७०॥
यस्यैतानि प्रदृश्यंते पर्वतः कनकानि च ।
संपत्तस्य प्रजायेत निश्चला सुखदा सदा ॥७१॥
दंतोत्तरेषु दंताश्च पंक्तिमाक्रम्य संस्थिताः ।
तेऽपि दोषकराः सर्वे शला काकृतिनस्तथा ।
उपदंताश्च सर्वे ते न ते दोषकराः क्वचित् ॥७२॥
भांडे कुंभे यदा चैव श्रूयते घनगर्जितम् ।
कंचुकानां गृहे चैव प्राकारः श्रूयते यदि ॥७३॥
मूषिकानां मुखे चैव ज्वलंती यस्य पश्यति ।
गेही तत्रैव नश्येत शुक्रस्याद्भुतदर्शनम् ॥७४॥
शांतिं तत्र प्रवक्ष्यामि यया संपद्यते शुभम् ।
शमीपत्रं निर्मितं च यवैर्युक्तं गृहिण्यपि ।
दधिमधुघृताक्तं च जुहुयाद्भार्गवे दिने ॥७५॥
शुक्लवासोयुगं चैव गां च शुक्लां पयस्विनीम् ।
सुवर्णं श्रद्धया चैव दद्याद्विप्राय दक्षिणाम् ॥७६॥
देवागारे यदा भूमिर्लोहिता यस्य दृश्यते ।
पुष्पिता दृश्यते लोके तत्र विद्धि महद्भयम् ॥७७॥
राजा वा राजपुत्रो वा राज्यं वापि विनश्यति ।
मंत्रिणो मंत्रिपुत्राश्च म्रियंते नात्र संशयः ॥७८॥
यत्र वा दृश्यते लोके गृहे यस्य सुपूजिताः ।
पुष्पिताश्च गृहस्तंभाः शरीरं च घटस्तथा ॥७९॥
हस्त्यश्वमहिषाश्चैव अजा गावस्तथैव च ।
नित्यं स्वामिवधार्थाय पुष्पितां प्रवहंति च ॥८०॥
गृहे हंसो गृहे सम्यङ्मण्डूका जलचारिणः ।
द्वारे प्रविश्य सर्पश्च प्रतिमायाः प्रकल्पनम् ॥८१॥
अकस्माद्घटशब्दोपि यत्र कुत्रापि जायते ।
स्रवंति प्रमदा यत्र भिन्नास्ते स्युर्नवांगिकाः ॥८२॥
गृही तत्र विनश्येत सपुत्रपशुबांधवः ।
धनुःखड्गधरा रात्रौ मध्याह्ने चान्द्रके तथा ॥८३॥
उदितो दृश्यते व्योम्नि ज्वलितः पावकस्तथा ।
मनुष्याङ्गनानां मरणं तथा स्याद्राष्ट्रविप्लवः ॥८४॥
रससिद्धानि वस्तूनि सुराद्याश्चापि वा पुनः ।
हस्तिनो मदयुक्ताश्च अश्वा धीरितहिंसकाः ।
विनश्यंति सदा चैते शनेरद्भुतदर्शने ॥८५॥
नगरे वा तथा ग्रामे जायन्ते तस्य वैरिणः ।
दिवा वा यदि वा रात्रौ शनेरद्भुतदर्शनम् ॥८६॥
मृगव्याघ्रादिरक्षांसि तथा गोमहिषा अपि ।
उत्पतंति यदा चैते शनेरद्भुतमादिशेत् ॥८७॥
निधिमंत्रं प्रवक्ष्यामि येन संपद्यते शुभम् ।
जुहुयादयुतं सम्यक्सस्यांश्च समिधं द्विजाः ॥८८॥

aśubhaṃ hi śubhenaiva śāṃtiṃ homaṃ ca kārayet |
tatraiva rākṣasaṃ yatra ghaṭakaṃ pariśoṣaṇam ||67||
kesarī śarkarā tailaṃ rājataṃ tāṃḍavaṃ sthitam |
māṣabhaktaṃ tathā dhānyaṃ suvarṇaṃ rajatāni ca ||68||
tāmraṃ kāṃsyaṃ tathā lohaṃ sīsakaṃ pittalaṃ tathā |
sthāpitānīva dṛśyaṃte gṛhe caitāni yasya vai ||69||
dhananāśo bhavettasya svarga bhaṃgo hyathāpi vā |
vyādhipīḍe tathā ghore rājopadravabaṃdhane |
gajāśvapaśubhṛtyānāṃ vināśo jāyate dhruvam ||70||
yasyaitāni pradṛśyaṃte parvataḥ kanakāni ca |
saṃpattasya prajāyeta niścalā sukhadā sadā ||71||
daṃtottareṣu daṃtāśca paṃktimākramya saṃsthitāḥ |
te:'pi doṣakarāḥ sarve śalā kākṛtinastathā |
upadaṃtāśca sarve te na te doṣakarāḥ kvacit ||72||
bhāṃḍe kuṃbhe yadā caiva śrūyate ghanagarjitam |
kaṃcukānāṃ gṛhe caiva prākāraḥ śrūyate yadi ||73||
mūṣikānāṃ mukhe caiva jvalaṃtī yasya paśyati |
gehī tatraiva naśyeta śukrasyādbhutadarśanam ||74||
śāṃtiṃ tatra pravakṣyāmi yayā saṃpadyate śubham |
śamīpatraṃ nirmitaṃ ca yavairyuktaṃ gṛhiṇyapi |
dadhimadhughṛtāktaṃ ca juhuyādbhārgave dine ||75||
śuklavāsoyugaṃ caiva gāṃ ca śuklāṃ payasvinīm |
suvarṇaṃ śraddhayā caiva dadyādviprāya dakṣiṇām ||76||
devāgāre yadā bhūmirlohitā yasya dṛśyate |
puṣpitā dṛśyate loke tatra viddhi mahadbhayam ||77||
rājā vā rājaputro vā rājyaṃ vāpi vinaśyati |
maṃtriṇo maṃtriputrāśca mriyaṃte nātra saṃśayaḥ ||78||
yatra vā dṛśyate loke gṛhe yasya supūjitāḥ |
puṣpitāśca gṛhastaṃbhāḥ śarīraṃ ca ghaṭastathā ||79||
hastyaśvamahiṣāścaiva ajā gāvastathaiva ca |
nityaṃ svāmivadhārthāya puṣpitāṃ pravahaṃti ca ||80||
gṛhe haṃso gṛhe samyaṅmaṇḍūkā jalacāriṇaḥ |
dvāre praviśya sarpaśca pratimāyāḥ prakalpanam ||81||
akasmāddhaṭaśabdopi yatra kutrāpi jāyate |
sravaṃti pramadā yatra bhinnāste syurnavāṃgikāḥ ||82||
gṛhī tatra vinaśyeta saputrapaśubāṃdhavaḥ |
dhanuḥkhaḍgadharā rātrau madhyāhne cāndrake tathā ||83||
udito dṛśyate vyomni jvalitaḥ pāvakastathā |
manuṣyāṅganānāṃ maraṇaṃ tathā syādrāṣṭraviplavaḥ ||84||
rasasiddhāni vastūni surādyāścāpi vā punaḥ |
hastino madayuktāśca aśvā dhīritahiṃsakāḥ |
vinaśyaṃti sadā caite śaneradbhutadarśane ||85||
nagare vā tathā grāme jāyante tasya vairiṇaḥ |
divā vā yadi vā rātrau śaneradbhutadarśanam ||86||
mṛgavyāghrādirakṣāṃsi tathā gomahiṣā api |
utpataṃti yadā caite śaneradbhutamādiśet ||87||
nidhimaṃtraṃ pravakṣyāmi yena saṃpadyate śubham |
juhuyādayutaṃ samyaksasyāṃśca samidhaṃ dvijāḥ ||88||

| | |
|---|---|
| शन्नो देवीति मंत्रेण शुभार्थं शनिवासरे । | śanno devīti maṃtreṇa śubhārthaṃ śanivāsare \| |
| चरुं च श्रपयेत्तत्र समुद्दिश्य शनैश्चरम् ॥८९॥ | caruṃ ca śrapayettatra samuddiśya śanaiścaram \|\|89\|\| |
| गां च नीलां ततो दद्याज्जीवद्वत्सां पयस्विनीम् । | gāṃ ca nīlāṃ tato dadyājjīvadvatsāṃ payasvinīm \| |
| वासोयुगं च विप्राय सुवर्णं रजतं तथा ॥९०॥ | vāsoyugaṃ ca viprāya suvarṇaṃ rajataṃ tathā \|\|90\|\| |
| दत्त्वा तु श्रद्धया सम्यग्दक्षिणां शिरसि स्थिताम् । | dattvā tu śraddhayā samyagdakṣiṇāṃ śirasi sthitām \| |
| विधिं होमावसाने तु ततः संपद्यते शुभम् ॥९१॥ | vidhiṃ homāvasāne tu tataḥ saṃpadyate śubham \|\|91\|\| |
| यदा द्वारे गोधिका च शंखिनी प्रविशेद्गृहम् । | yadā dvāre godhikā ca śaṃkhinī praviśedgṛham \| |
| तदाऽशुभं विजानीयाद्राजपीडा धनक्षयः । | tadā:'śubhaṃ vijānīyādrājapīḍā dhanakṣayaḥ \| |
| अयुतं जुहुयात्सम्यक्ततः संपद्यते शुभम् ॥९२॥ | ayutaṃ juhuyātsamyaktataḥ saṃpadyate śubham \|\|92\|\| |
| विना गर्जितमेघेन शिलावृष्टिः प्रजायते । | vinā garjitameghena śilāvṛṣṭiḥ prajāyate \| |
| रक्तमिश्रा हि पांडुश्च पतन्ती यत्र दृश्यते ॥९३॥ | raktamiśrā hi pāṃḍuśca patantī yatra dṛśyate \|\|93\|\| |
| तत्र संदृश्यते चाभ्रं वृक्षा वातविवर्जिताः । | tatra saṃdṛśyate cābhraṃ vṛkṣā vātavivarjitāḥ \| |
| शक्रध्वजस्तथा चापं पतनं सुमनस्य च ॥९४॥ | śakradhvajastathā cāpaṃ patanaṃ sumanasya ca \|\|94\|\| |
| दिवा शिवा पुरा रौति उलूको वा निशाचरः । | divā śivā purā rauti ulūko vā niśācaraḥ \| |
| निशि निपत्य काकुत्स्थे प्रदेशे रौति वा वृषः ॥९५॥ | niśi nipatya kākutsthe pradeśe rauti vā vṛṣaḥ \|\|95\|\| |
| अधर्मप्रबला देशा राजा धर्मपराङ्मुखः । | adharmaprabalā deśā rājā dharmaparāṅmukhaḥ \| |
| अन्योन्यं च जिघांसंति गोब्राह्मणमथापि वा ॥९६॥ | anyonyaṃ ca jighāṃsaṃti gobrāhmaṇamathāpi vā \|\|96\|\| |
| गृहे गृही विनश्येच्च सपुत्रपशुबांधवः । | gṛhe gṛhī vinaśyecca saputrapaśubāṃdhavaḥ \| |
| उत्सानं द्वारदेशेऽस्य मरणं राष्ट्रविभ्रमः ॥९७॥ | utsānaṃ dvāradeśe:'sya maraṇaṃ rāṣṭravibhramaḥ \|\|97\|\| |
| राज्यनाशो भवेद्राज्ञो मरणं वाहनस्य च । | rājyanāśo bhavedrājño maraṇaṃ vāhanasya ca \| |
| विपरीतानि देशानि क्रमतः संभवंति हि ॥९८॥ | viparītāni deśāni kramataḥ saṃbhavaṃti hi \|\|98\|\| |
| राहुणा ग्रस्तसूर्योऽपि निशि चाथ यदा दिवा । | rāhuṇā grastasūryo:'pi niśi cātha yadā divā \| |
| तारकागणवच्चैव राज्ञां निधनकारकः ॥९९॥ | tārakāgaṇavaccaiva rājñāṃ nidhanakārakaḥ \|\|99\|\| |
| सहामात्या विनश्यंति स्वर्गे ये च सुदुर्जयाः । | sahāmātyā vinaśyaṃti svarge ye ca sudurjayāḥ \| |
| परचक्रेण पात्यंते राजानो नात्र संशयः ॥१००॥ | paracakreṇa pātyaṃte rājāno nātra saṃśayaḥ \|\|100\|\| |
| छायाध्वजश्च गगने दृश्यते चेत्कदाचन । | chāyādhvajaśca gagane dṛśyate cetkadācana \| |
| दर्शनादेव राज्ञस्तु विनाशः सहराष्ट्रकैः ॥१०१॥ | darśanādeva rājñastu vināśaḥ saharāṣṭrakaiḥ \|\|101\|\| |
| ज्वलितो दृश्यते यत्र पावकश्च सकृज्जले । | jvalito dṛśyate yatra pāvakaśca sakṛjjale \| |
| वज्रे शिरसि गात्रे वा जीवितं तस्य दुर्लभम् ॥१०२॥ | vajre śirasi gātre vā jīvitaṃ tasya durlabham \|\|102\|\| |
| द्वारोपांते तथा स्तंभे आग्निर्वा धूम एव वा । | dvāropāṃte tathā staṃbhe āgnirvā dhūma eva vā \| |
| पुरुषस्य तु तत्रैव मरणं जायते ध्रुवम् ॥१०३॥ | puruṣasya tu tatraiva maraṇaṃ jāyate dhruvam \|\|103\|\| |
| गगनेऽशनिघातश्च शक्तिहस्तेन वा पुनः । | gagane:'śanighātaśca śaktihastena vā punaḥ \| |
| अब्दस्याभ्यंतरे तस्य मरणं नात्र संशयः ॥१०४॥ | abdasyābhyaṃtare tasya maraṇaṃ nātra saṃśayaḥ \|\|104\|\| |
| शिखावलयमध्ये तु सधूमः पावकोद्गमः । | śikhāvalayamadhye tu sadhūmaḥ pāvakodgamaḥ \| |
| दृश्यते नगरे मध्ये तत्रैवाद्भुतदर्शनम् ॥१०५॥ | dṛśyate nagare madhye tatraivādbhutadarśanam \|\|105\|\| |
| शवस्य नीयमानस्य उत्थानं वा प्रमादतः । | śavasya nīyamānasya utthānaṃ vā pramādataḥ \| |
| स्थापितस्य च लिंगस्य अन्यत्र गमनं तथा ॥१०६॥ | sthāpitasya ca liṃgasya anyatra gamanaṃ tathā \|\|106\|\| |
| निर्घातश्चापि भूकंपो निवातोल्काप्रदर्शनम् । | nirghātaścāpi bhūkaṃpo nivātolkāpradarśanam \| |
| अकाले पुष्पिता वृक्षाः फलं चाकालसंभवम् । ॥१०७॥ | akāle puṣpitā vṛkṣāḥ phalaṃ cākālasaṃbhavam \| \|\|107\|\| |
| अनिमित्तानि सर्वाणि दूरमागत्य निर्भरम् । | animittāni sarvāṇi dūramāgatya nirbharam \| |
| अनिमित्तस्य नाशो यः सैंहिकेयकृतस्य च ॥१०८॥ | animittasya nāśo yaḥ saiṃhikeyakṛtasya ca \|\|108\|\| |
| नराणामासनं चैव गवां वा मानुषीगिरा । | narāṇāmāsanaṃ caiva gavāṃ vā mānuṣīgirā \| |
| पक्षमात्रांतरे तस्य पुत्रस्य मरणं दिशेत् ॥१०९॥ | pakṣamātrāṃtare tasya putrasya maraṇaṃ diśet \|\|109\|\| |
| अयुतं जुहुयात्तत्र राहुमुद्दिश्य यत्नतः । | ayutaṃ juhuyāttatra rāhumuddiśya yatnataḥ \| |
| शांतिमत्र प्रवक्ष्यामि यया संपद्यते शुभम् ॥११०॥ | śāṃtimatra pravakṣyāmi yayā saṃpadyate śubham \|\|110\|\| |
| दधिमधुघृताक्तं च कुर्याद्दूर्वाक्षतं तथा । | dadhimadhughṛtāktaṃ ca kuryāddūrvākṣataṃ tathā \| |
| कलायु इति मन्त्रेण जुहुयाद्रविवासरे ॥१११॥ | kalāyu iti mantreṇa juhuyādravivāsare \|\|111\|\| |
| चरुं च श्रपयेत्तत्र राहुमुदिश्य संश्रयात् । | caruṃ ca śrapayettatra rāhumudiśya saṃśrayāt \| |

होमं कुर्यात्ततो गां च कपिलां च पयस्विनीम् ॥११२॥
अतसी तिलशंखौ वा वासोयुगमथापि वा ।
श्रद्धया राहुमुद्दिश्य दद्याद्विप्राय दक्षिणाम् ॥११३॥
दुरितस्य विनाशाय तस्य संपद्यते शुभम् ।
दधिमधुघृतक्षीरेण वारुणेन च वारुणे ॥११४॥
दृश्यते चाद्भुतं तेषु विशिष्टैर्दोषदर्शिभिः ।
गृही तत्र विनष्टश्च भवेत्सपशुबांधवः ॥११५॥
दृश्यंते तत्र क्रौञ्चाश्च जंबुका गृध्रवायसाः ।
दारुणं भीषणं घोरं नृत्यंति च हसंति च ॥११६॥
मैथुनानि च सर्वेषां यस्य वासे भवेद्यदि ।
मृत्युस्तस्य भवेदाशु ईश्वरस्य च शासनात् ॥११७॥
धूमकेतुर्यदा व्योम्नि ज्वलत्पावक सन्निभः ।
स्थानात्स्थानांतरं याति भूमौ वा पतते भृशम् ।
सबंधुरस्यते राजा परचक्रैः स पीडितः ॥११८॥
दुर्भिक्षं मरणं चैव चिरं राष्ट्रे भविष्यति ।
गावो मर्कटकुंभा व विशंते गृहवेश्मनि ॥११९॥
गावश्च तस्य नश्यंति दारापत्यधनानि च ।
अन्यस्य दोषो भवति गृहे यांति प्रमादतः ॥१२०॥
अब्दांतरे भवेन्मृत्युर्विरजा हि भविष्यति ।
शांतिमत्र प्रवक्ष्यामि यया संपद्यते शुभम् ॥१२१॥
सप्ताश्वरथसंयुक्तं हेमच्छत्रविभूषितम् ।
विप्राय मंडपं दद्याद्बिल्वपत्रमथापि वा ॥१२२॥
ऐंद्रेणैव तु मन्त्रेण होमः कार्यो द्विजातिभिः ।
अकस्माच्छालतालाक्षखदिरोत्पलसेरकाः ॥१२३॥
गृहमध्ये प्रजायेत केतोरद्भुतदर्शनम् ।
हंसो वा द्रोणकाको वा मयूरो वा गृहोपरि ॥१२४॥
गृहे तस्य महोत्पातः केतोरद्भुतदर्शनम् ।
शांतिमत्र प्रवक्ष्यामि यया संपद्यते शुभम्॥१२५॥
दधिमधुघृताक्तं च जुहुयादयुतं कुशम्।
त्र्यंबकं चेति मन्त्रेण केतवेभिवपे चरुम् ॥१२६॥
नीलां धेनुं सवत्सां च बहुक्षीरप्रदां तथा ।
मृत्तिकां हेमवासश्च नानालंकारमेव च ॥१२७॥
दक्षिणां च प्रवक्ष्यामि यस्य नास्ति प्रतिक्रिया ।
देवमुद्दिश्य दानेन होमेन चरुणा तथा ॥१२८॥
दक्षिणस्यां दिशि च्छायां यः पश्येदात्मनः स्वयम् ।
स्वच्छायां पादुकस्यैव पश्येत्पञ्चशिरोद्वयम् ॥१२९॥
एवमेवैव यच्छिन्नं शिनष्टि च ततो हितम् ।
शीघ्रं नाशमवाप्नोति सप्ताहान्नात्र संशयः ॥१३०॥
उच्चावचान्प्रवक्ष्यामि यथा शास्त्रेण चोदितम् ।
काकमार्जारशूकानां कपोतानां विशेषतः ।
मैथुनं दृश्यते यत्र तच्च राहोर्महाद्भुतम् ॥१३१॥
शनिमुद्दिश्य जुहुयादयुतं शनिवासरे ।
पूजयेदर्कपुष्पेण शतेन जुहुयाच्चरुम् ॥१३२॥
कृत्वा तत्रैव पश्येत शनेरद्भुतदर्शनम् ।
अष्टाविंशं चरुं कृत्वा ततः शांतिर्भवेद्ध्रुवम् १३३॥
भुजपदोस्तथा चक्षुःस्पंदने मरणं दिशेत् ।
तत्तु सोमाद्भुतं विद्याद्वामदक्षिणतः क्रमात् ॥१३४॥
कृष्णपक्षे भवेद्वामे विपरीतेऽद्भुतं दिशेत् ।

homaṃ kuryāttato gāṃ ca kapilāṃ ca payasvinīm ||112||
atasī tilaśaṃkhau vā vāsoyugamathāpi vā |
śraddhayā rāhumuddiśya dadyādviprāya dakṣiṇām ||113||
duritasya vināśāya tasya saṃpadyate śubham |
dadhimadhughṛtakṣīreṇa vāruṇena ca vāruṇe ||114||
dṛśyate cādbhutaṃ teṣu viśiṣṭairdoṣadarśibhiḥ |
gṛhī tatra vinaṣṭaśca bhavetsapaśubāṃdhavaḥ ||115||
dṛśyaṃte tatra krauñcāśca jaṃbukā gṛdhravāyasāḥ |
dāruṇaṃ bhīṣaṇaṃ ghoraṃ nṛtyaṃti ca hasaṃti ca ||116||
maithunāni ca sarveṣāṃ yasya vāse bhavedyadi |
mṛtyustasya bhavedāśu īśvarasya ca śāsanāt ||117||
dhūmaketuryadā vyomni jvalatpāvaka sannibhaḥ |
sthānātsthānāṃtaraṃ yāti bhūmau vā patate bhṛśam |
sabaṃdhurasyate rājā paracakraiḥ sa pīḍitaḥ ||118||
durbhikṣaṃ maraṇaṃ caiva ciraṃ rāṣṭre bhaviṣyati |
gāvo markaṭakuṃbhā va viśaṃte gṛhaveśmani ||119||
gāvaśca tasya naśyaṃti dārāpatyadhanāni ca |
anyasya doṣo bhavati gṛhe yāṃti pramādataḥ ||120||
abdāṃtare bhavenmṛtyurvirajā hi bhaviṣyati |
śāṃtimatra pravakṣyāmi yayā saṃpadyate śubham ||121||
saptāśvarathasaṃyuktaṃ hemacchatravibhūṣitam |
viprāya maṃḍapaṃ dadyādbilvapatramathāpi vā ||122||
aiṃdreṇaiva tu mantreṇa homaḥ kāryo dvijātibhiḥ |
akasmācchālatālākṣakhadirotpalaserakāḥ ||123||
gṛhamadhye prajāyeta ketoradbhutadarśanam |
haṃso vā droṇakāko vā mayūro vā gṛhopari ||124||
gṛhe tasya mahotpātaḥ ketoradbhutadarśanam |
śāṃtimatra pravakṣyāmi yayā saṃpadyate śubham||125||
dadhimadhughṛtāktaṃ ca juhuyādayutaṃ kuśam|
tryaṃbakaṃ ceti mantreṇa ketavebhivape ccarum ||126||
nīlāṃ dhenuṃ savatsāṃ ca bahukṣīrapradāṃ tathā |
mṛttikāṃ hemavāsaśca nānālaṃkārameva ca ||127||
dakṣiṇāṃ ca pravakṣyāmi yasya nāsti pratikriyā |
devamuddiśya dānena homena caruṇā tathā ||128||
dakṣiṇasyāṃ diśi cchāyāṃ yaḥ paśyedātmanaḥ svayam |
svacchāyāṃ pādukasyaiva paśyetpañcaśirodvayam ||129||
evamevaiva yacchinnaṃ śinaṣṭi ca tato hitam |
śīghraṃ nāśamavāpnoti saptāhānnātra saṃśayaḥ ||130||
uccāvacānpravakṣyāmi yathā śāstreṇa coditam |
kākamārjāraśūkānāṃ kapotānāṃ viśeṣataḥ |
maithunaṃ dṛśyate yatra tacca rāhormahādbhutam ||131||
śanimuddiśya juhuyādayutaṃ śanivāsare |
pūjayedarkapuṣpeṇa śatena juhuyāccarum ||132||
kṛtvā tatraiva paśyeta śaneradbhutadarśanam |
aṣṭāviṃśaṃ caruṃ kṛtvā tataḥ śāṃtirbhaveddhruvam 133||
bhujapadostathā cakṣuḥspaṃdane maraṇaṃ diśet |
tattu somādbhutaṃ vidyādvāmadakṣiṇataḥ kramāt ||134||
kṛṣṇapakṣe bhavedvāme viparīte:'dbhutaṃ diśet |

| | |
|---|---|
| अनिष्टसूचकं यस्मात्तस्माच्छांतिं प्रकल्पयेत् ॥१३५॥ | aniṣṭasūcakaṃ yasmāttasmācchāṃtiṃ prakalpayet \|\|135\|\| |
| शतार्द्धं रविमुद्दिश्य शान्त्यर्थे होममाचरेत् । | śatārddhaṃ ravimuddiśya śāntyarthe homamācaret \| |
| चरुपाकविधानेन यवैस्तिलसुसर्पिषा ॥१३६॥ | carupākavidhānena yavaistilasusarpiṣā \|\|136\|\| |
| पुस्तके यज्ञसूत्रं च असत्पात्रे चरौ तु वा । | pustake yajñasūtraṃ ca asatpātre carau tu vā \| |
| शक्रवस्त्रप्रदग्धे च सूर्यस्याद्भुतदर्शनम् ॥१३७॥ | śakravastrapradagdhe ca sūryasyādbhutadarśanam \|\|137\|\| |
| हयमारं त्रिमध्वक्तं जुहुयादिष्टसिद्धये । | hayamāraṃ trimadhvaktaṃ juhuyādiṣṭasiddhaye \| |
| देवपुस्तकरत्नानि मणिकांचनमेव च ॥१३८॥ | devapustakaratnāni maṇikāṃcanameva ca \|\|138\|\| |
| लोहितस्याद्भुतं विद्यात्सहस्त्रं च विशोधनम् । | lohitasyādbhutaṃ vidyātsahasraṃ ca viśodhanam \| |
| देवागारे तथा गोधा शंखिनी प्रविशेत्क्वचित् ॥१३९॥ | devāgāre tathā godhā śaṃkhinī praviśetkvacit \|\|139\|\| |
| द्रोणकाको बकश्चैव उलूकद्वयमेव च । | droṇakāko bakaścaiva ulūkadvayameva ca \| |
| रक्तकंठः कपोतश्च व्याघ्र एणश्च वा विशेत् ॥१४०॥ | raktakaṃṭhaḥ kapotaśca vyāghra eṇaśca vā viśet \|\|140\|\| |
| यस्य देवगृहं पश्येत्तस्य तस्यायुतं हुनेत् । | yasya devagṛhaṃ paśyettasya tasyāyutaṃ hunet \| |
| न चात्र गृहवैकृत्यं हसनं यदि दृश्यते । | na cātra gṛhavaikṛtyaṃ hasanaṃ yadi dṛśyate \| |
| संपत्तिसूचकं गेहे मरणं दुःखदर्शनम् ॥१४१॥ | saṃpattisūcakaṃ gehe maraṇaṃ duḥkhadarśanam \|\|141\|\| |
| क्रंदने हतराज्येन गजाश्ववाहने क्वचित् । | kraṃdane hatarājyena gajāśvavāhane kvacit \| |
| सूर्यमुद्दिश्य जुहुयादयुतं सर्वसिद्धये ॥१४२॥ | sūryamuddiśya juhuyādayutaṃ sarvasiddhaye \|\|142\|\| |
| प्रमादात्कंपने हानिः स्वेदे जाते विपद्भवेत् । | pramādātkaṃpane hāniḥ svede jāte vipadbhavet \| |
| क्षीरस्त्रावे च रुधिरे तत्र राज्ये महद्भयम् ॥१४३॥ | kṣīrasrāve ca rudhire tatra rājye mahadbhayam \|\|143\|\| |
| गोच्छागौ वाथ गोमायुर्गृहोपरि प्रनृत्यति । | gocchāgau vātha gomāyurgṛhopari pranṛtyati \| |
| यदा रौति दिवा फेरुस्तदा नाशो भवेद्ध्रुवम् ॥१४४॥ | yadā rauti divā pherustadā nāśo bhaveddhruvam \|\|144\|\| |
| श्वजंबुकावथ व्याघ्रो यथाशक्ति च धावति । | śvajaṃbukāvatha vyāghro yathāśakti ca dhāvati \| |
| ईशाने महिषस्तद्वत्तदा देशे च विप्लवः ॥१४५॥ | īśāne mahiṣastadvattadā deśe ca viplavaḥ \|\|145\|\| |
| राहोरद्भुतमुदिश्य सहस्त्रं जुहुयाच्चरुम् । | rāhoradbhutamudiśya sahasraṃ juhuyāccarum \| |
| वृक्षाद्भुतं यदा पश्येत्तत्र तस्यां परित्यजेत् । | vṛkṣādbhutaṃ yadā paśyettatra tasyāṃ parityajet \| |
| यद्गृहेषु हुतं याति देशविप्लवमादिशेत् । ॥१४६॥ | yadgṛheṣu hutaṃ yāti deśaviplavamādiśet \| \|\|146\|\| |
| देशे वा नगरे ग्रामे आरण्यपशुबन्धनम् । | deśe vā nagare grāme āraṇyapaśubandhanam \| |
| सर्पे वा विपरीतं च मांसपिंडमथापि वा । | sarpe vā viparītaṃ ca māṃsapiṃḍamathāpi vā \| |
| तद्गृहे मरणं चैव देश विप्लवमादिशेत् ॥१४७॥ | tadgṛhe maraṇaṃ caiva deśa viplavamādiśet \|\|147\|\| |
| दिवाद्भुतेऽयुतं रात्रौ द्विगुणं च भवेद्ध्रुवम् । | divādbhute:'yutaṃ rātrau dviguṇaṃ ca bhaveddhruvam \| |
| द्विगुणं चापि संध्यायामर्धरात्रे चतुर्गुणम् ॥१४८॥ | dviguṇaṃ cāpi saṃdhyāyāmardharātre caturguṇam \|\|148\|\| |
| अकाले तत्र मरणमकाले गृहिणीमृतिः । | akāle tatra maraṇamakāle gṛhiṇīmṛtiḥ \| |
| सौराद्भुतं विजानीयादशुभे वा विशोधनम् ॥१४९॥ | saurādbhutaṃ vijānīyādaśubhe vā viśodhanam \|\|149\|\| |
| एकैकस्यायुतं यत्र कुर्यात्तत्रैव होमयेत् । | ekaikasyāyutaṃ yatra kuryāttatraiva homayet \| |
| सांगोपांगेन सहित मष्टावष्टौ हुतं च वा ॥१५०॥ | sāṃgopāṃgena sahita maṣṭāvaṣṭau hutaṃ ca vā \|\|150\|\| |
| अधिप्रत्यधिसहितं गृहपक्षेऽपि सत्तमाः । | adhipratyadhisahitaṃ gṛhapakṣe:'pi sattamāḥ \| |
| तन्मानेन हुतं विप्रा कुर्यात्तत्रैव भूषणम् ॥१५१॥ | tanmānena hutaṃ viprā kuryāttatraiva bhūṣaṇam \|\|151\|\| |
| एकैकस्याहुतं विप्रा अष्टावष्टौ हुतं च वा । | ekaikasyāhutaṃ viprā aṣṭāvaṣṭau hutaṃ ca vā \| |
| अधिप्रत्यधिदेवानां याश्चान्याश्चांगदेवताः ॥१५२॥ | adhipratyadhidevānāṃ yāścānyāścāṃgadevatāḥ \|\|152\|\| |
| मानांतं च ददेत्पूर्णां दत्त्वा पूर्णां न होमयेत् । | mānāṃtaṃ ca dadetpūrṇāṃ dattvā pūrṇāṃ na homayet \| |
| वक्ष्ये ग्रहमखे मानं येन मानेन सिध्यति ॥१५३॥ | vakṣye grahamakhe mānaṃ yena mānena sidhyati \|\|153\|\| |
| अमानकरणे दोषस्तस्मान्मानं न हापयेत् । | amānakaraṇe doṣastasmānmānaṃ na hāpayet \| |
| पंक्तिचत्वारिंशदाद्यैश्चतुर्धा विभजेन्नरः ॥१५४॥ | paṃkticatvāriṃśadādyaiścaturdhā vibhajennaraḥ \|\|154\|\| |
| अनिष्टाय ततो दद्याच्चरुहोमं विभागशः । | aniṣṭāya tato dadyāccaruhomaṃ vibhāgaśaḥ \| |
| अधिप्रत्यधिदेवानामष्टावष्ट ह्युदाहृतम् ॥१५५॥ | adhipratyadhidevānāmaṣṭāvaṣṭa hyudāhṛtam \|\|155\|\| |
| त्र्यंबकादिषु मंत्रेषु होमत्रयमुदाहृतम् । | tryaṃbakādiṣu maṃtreṣu homatrayamudāhṛtam \| |
| धनंजये तथा दद्याच्चरुहोमं विभागतः ॥१५६॥ | dhanaṃjaye tathā dadyāccaruhomaṃ vibhāgataḥ \|\|156\|\| |
| आदित्यायाष्टावष्टावधिककल्पयेत्सुधीः । | ādityāyāṣṭāvaṣṭāvadhikakalpayetsudhīḥ \| |
| शतहोमे तु सर्वत्र दशांगं कल्पयेन्नरः ॥१५७॥ | śatahome tu sarvatra daśāṃgaṃ kalpayennaraḥ \|\|157\|\| |

अनिष्टाय युगांगं तु ग्रहेभ्यो ह्यंगनाय च ।
अधिप्रत्यधिदेवानां तथैवांगं प्रकल्पयेत् ॥१५८॥
द्वौ तु दद्यात्र्यंबकाय तथा धनंजयाय च ।
तत्र होमो नायकाय सर्वत्रैव विचक्षणः ॥१५९॥
सहस्रे चैव विंशांगे अनिष्टाय दशांशकम् ।
पञ्चांशेन ग्रहाणां च पञ्चांशेन यवानपि ॥१६०॥
तत्रानिष्टे पंचशतं तस्यार्धं ग्रहवाग्यतः ।
एकत्रिंशद्भवेन्मानम् (३१) अन्येषां तु चतुर्दश (१४) ॥१६१॥
ग्रहाधिकं होमयुगं तत्र भागे प्रकल्पयेत् ।
अधातये च तिथ्यंगं पञ्चांगं यस्य चाद्भुतम् ॥१६२॥
ग्रहेभ्यश्चैव पंचांगं तत्र वांगं परानपि ।
एकैकांगे भवेन्मानं षट्शतं षष्टिरेव च ॥१६३॥
अधिकं च भवेत्षष्टिर्दशमे भागशेषतः ।
अनिष्टांशे त्रिसहस्रं त्रिशतं त्रिंशतं तथा ॥१६४॥
चतुःशतं ग्रहाणां च तथा सप्तशताधिकम् ।
उपग्रहेभ्यो दद्याच्च पंचाशीत्यधिकं शतम् ॥१६५॥
तिथ्यंगभागः शेषेण ग्रहे सप्तशताधिकम् ।
एकैकं तु ग्रहस्यैवमादित्याय युगं भवेत् ॥१६६॥
ग्रहांगे यः स्थितो भागो युगलं भागशेषतः ।
त्र्यंबकाय च तद्दद्यात्तथा धनंजयाय च ॥१६७॥
शांतिके पौष्टिके काम्ये यदीच्छेत्सुखमात्मनः।
ग्रहाणां चायुतं होमं त्र्यहसाध्येन होमयेत् ॥१६८॥
त्र्यहसाध्ये विधानं यत्पुरैवोदीरितं द्विजाः ।
इदानीं प्रक्रमेणैव यो भागः स निगद्यते ॥१६९॥
पूर्वस्मिन्दिवसेऽनिष्टे सहस्रं त्रिशतोत्तरम् (१३००) ।
इतरेषां ग्रहाणां च प्रत्येकं तु शतं शतम् (१००) ॥१७०॥
अधिप्रत्यधिदेवानां पंचाशद्धोम उच्यते ।
प्रथमेह्नि प्रदद्याच्च मिलित्वा त्रिसहस्रकम् (३०००) ॥१७१॥
द्वितीयदिवसेऽनिष्टे द्विसहस्रमुदाहृतम् (२०००) ।
प्रति ग्रहेभ्यस्त्रिशतं दद्यादष्ट शताधिकम् (१०८) ॥१७२॥
उपग्रहेभ्यो दद्याच्च षोडशभ्यो यथाक्रमम् ।
एकाशीतिं ददौ यत्नादशीतिं चांत्ययोर्द्वयोः ॥१७३॥
एवं द्वितीयदिवसे मिलित्वा षट्सहस्रकम् (६०००) ।
अनिष्टाय त्रिशतं तु तृतीयदिवसे मतम् ॥१७४॥
तत्प्रत्येकं ग्रहाणां च द्वाचत्वारिंशदुच्यते ।
अधिप्रत्यधिदेवानां प्रत्येकं पंचत्रिंशकम् ॥१७५॥
तृतीयदिवसे दद्यान्मिलित्वैकसहस्रकम् (१०००) ।
आदित्याय युगं दद्यादेकं तु त्र्यंबकाय च ॥१७६॥
धनंजयाय होमैकमेकं चायुतमुच्यते ।
तदर्धकं ग्रहेभ्यश्च इतरेभ्यस्तदर्धकम् ॥१७७॥
ग्रहाणां त्रिसहस्रं तु पंचानां च सहस्रकम् ।
त्रिसहस्रभागशेषमादित्याय सहस्रकम् ॥१७८॥
त्र्यंबकाय तथा दद्यात्तथा धनंजयाय च ।
षट्पादाधिक षटषट्कसहस्रपरिसंख्यया ।
नवश्लोकशतोद्भूतं संपूर्णं स्याद्भविष्यकम् ॥१७९॥ ।

aniṣṭāya yugāṃgaṃ tu grahebhyo hyaṃganāya ca |
adhipratyadhidevānāṃ tathaivāṃgaṃ prakalpayet ||158||
dvau tu dadyāttryaṃbakāya tathā dhanaṃjayāya ca |
tatra homo nāyakāya sarvatraiva vicakṣaṇaḥ ||159||
sahasre caiva viṃśāṃge aniṣṭāya daśāṃśakam |
pañcāṃśena grahāṇāṃ ca pañcāṃśena yavānapi ||160||
tatrāniṣṭe paṃcaśataṃ tasyārdhaṃ grahavāgyataḥ |
ekatriṃśadbhavenmānam (31) anyeṣāṃ tu caturdaśa (14) ||161||
grahādhikaṃ homayugaṃ tatra bhāge prakalpayet |
adhātaye ca tithyaṃgaṃ pañcāṃgaṃ yasya cādbhutam ||162||
grahebhyaścaiva paṃcāṃgaṃ tatra vāṃgaṃ parānapi |
ekaikāṃge bhavenmānaṃ ṣaṭśataṃ ṣaṣṭireva ca ||163||
adhikaṃ ca bhavetṣaṣṭirdaśame bhāgaśeṣataḥ |
aniṣṭāṃśe trisahasraṃ triśataṃ triṃśataṃ tathā ||164||
catuḥśataṃ grahāṇāṃ ca tathā saptaśatādhikam |
upagrahebhyo dadyācca paṃcāśītyadhikaṃ śatam ||165||
tithyaṃgabhāgaḥ śeṣeṇa grahe saptaśatādhikam |
ekaikaṃ tu grahasyaivamādityāya yugaṃ bhavet ||166||
grahāṃge yaḥ sthito bhāgo yugalaṃ bhāgaśeṣataḥ |
tryaṃbakāya ca taddadyāttathā dhanaṃjayāya ca ||167||
śāṃtike pauṣṭike kāmye yadīcchetsukhamātmanaḥ|
grahāṇāṃ cāyutaṃ homaṃ tryahasādhyena homayet ||168||
tryahasādhye vidhānaṃ yatpuraivodīritaṃ dvijāḥ |
idānīṃ prakrameṇaiva yo bhāgaḥ sa nigadyate ||169||
pūrvasmindivase:'niṣṭe sahasraṃ triśatottaram (1300) |
itareṣāṃ grahāṇāṃ ca pratyekaṃ tu śataṃ śatam (100) ||170||
adhipratyadhidevānāṃ paṃcāśaddhoma ucyate |
prathamehni pradadyācca militvā trisahasrakam (3000) ||171||
dvitīyadivase:'niṣṭe dvisahasramudāhṛtam (2000) |
prati grahebhyastriśataṃ dadyādaṣṭa śatādhikam (108) ||172||
upagrahebhyo dadyācca ṣoḍaśabhyo yathākramam |
ekāśītiṃ dadau yatnādaśītiṃ cāṃtyayordvayoḥ ||173||
evaṃ dvitīyadivase militvā ṣaṭsahasrakam (6000) |
aniṣṭāya triśataṃ tu tṛtīyadivase matam ||174||
tatpratyekaṃ grahāṇāṃ ca dvācatvāriṃśaducyate |
adhipratyadhidevānāṃ pratyekaṃ paṃcatriṃśakam ||175||
tṛtīyadivase dadyānmilitvaikasahasrakam (1000) |
ādityāya yugaṃ dadyādekaṃ tu tryaṃbakāya ca ||176||
dhanaṃjayāya homaikamekaṃ cāyutamucyate |
tadardhakaṃ grahebhyaśca itarebhyastadardhakam ||177||
grahāṇāṃ trisahasraṃ tu paṃcānāṃ ca sahasrakam |
trisahasrabhāgaśeṣamādityāya sahasrakam ||178||
tryaṃbakāya tathā dadyāttathā dhanaṃjayāya ca |
ṣaṭpādādhika ṣaṭaṣaṭkasahasraparisaṃkhyayā |
navaślokaśatodbhūtaṃ saṃpūrṇaṃ syādbhaviṣyakam ||179|| |

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे विंशोऽध्यायः ॥२०॥

iti śrībhaviṣye mahāpurāṇe madhyamaparvaṇi tṛtīyabhāge viṃśo:'dhyāyaḥ ||20||

इति तृतीयभागः समाप्तः ।

iti tṛtīyabhāgaḥ samāptaḥ |

इति श्रीभविष्ये महापुराणे मध्यमपर्व समाप्तम् ।
iti śrībhaviṣye mahāpurāṇe madhyamaparva samāptam |
श्रीवेङ्कटेश्वरार्पणमस्तु ।
śrīveṅkaṭeśvarārpaṇamastu |
विषयानुक्रमणिका ॥३॥
viṣayānukramaṇikā ||3||